Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्हम्

# ॥ द्वादशपर्वीव्याख्यानम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीखरतरगच्छीयमुनिरत्नैः श्रीमद्भिः क्षमाकल्याणोपाध्यायैः

विरचितम्

तच्च

श्रीखरतरगच्छमण्डन श्रीमत्त्रैलोक्यसागराज्ञानुसारिणीभिः

साध्वीवर लक्ष्मी दीक्षितासिंहश्रीशिष्याभिरुपदिष्टाभिः

लाडुबाई अचरजबाई मक्खूबाई

इत्येताभिः सुश्राविकाभिः

६२ काव्हेल मोहमयी नं. २ इत्यत्र सु-वर्ण प्रिंटिंग मुद्रामंदिरे व्ही. पी. गोठोस्कर इत्यनेन मुद्रापयित्वा प्राकाश्यं नीतम् ।

वीर संवत् २४४० विक्रम संवत् १९७० अमूल्य मितीलं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# प्रस्तावना

॥ अर्हम् ॥

विदितमेवात्र खलु श्रुतपारदृश्वनां भव्यजमन्नां, यदुत त्रिभुवनतिलकायमानभगवदर्हद्वचनाशयं विविद्वद्भिर्विद्वद्भिः पूर्वाचार्यैः साम्प्रतिकानां भव्यानां सुखहेतवे नानाविधानि निर्मितानि प्रकरणरत्नानि, सुबहूनि च तानि तानि व्याख्यानकानि। तेष्वेवान्यतमं द्वादशपर्वी व्याख्यानं व्याख्यानविन्धरत्नं प्राणायि श्रीमद्भिः प्रवरतरखरतरगच्छगगनाङ्गणाम्बरमणीयमानैः समुपार्जितभूपसभासंमानैरमानैः श्रीक्षमाकल्याणकाभिधानैरुपाध्यायैः।

एते कदा कतमं महीमंण्डलं मण्डयामासुरिति खलु परिपृच्छायां प्रवर्त्तमानायामेतदत्रोत्तरामः—यदुतैते विचारविदो महानुभावा एकोत्तरोष्टादशशततमे (१८०१) हायने वैक्रमे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मरुस्थलीयं केशरदेशर नामानं ग्रामं मालुनामानमन्वयं च सहैवात्मना दापयाञ्चक्रुः।

द्वादशोत्तराष्टादशशततमे ( १८१२ ) वैक्रमे वत्सरे चाल्पीयसा कालेनैव समुपजातवराग्यातिरेकास्ते दीक्षामग्रहीषुरमृतधर्माभिधानेभ्यो मुनिवरेभ्यः । अध्ययनं त्वेभिर्व्यधीयत विविधशास्त्रपारंगतेभ्यः श्रीराजसोमोपाध्यायेभ्यः । पठनविषयेऽमीषां कीदृग मातिवैभवसमभवदिति तु पुरो दर्शमानेन श्रीपुण्यचरितकाव्ये वर्णितेन पद्यत्रयेण ज्ञास्यते विज्ञवरैः तथाहि--

" छात्रेषु सर्वेषु पठत्सु जातुचिद् वाराणसेयो विबुधः समाययौ । शिष्याः समे मङ्क्षु पराङ्मुखी कृतास्तेनैककेनोत्तमशास्त्रचर्चया ॥ छात्रेषु सर्वेष्ववलोकयत्सु स्व-मन्येषु पश्यत्सु च पाठकाननम् । पृथ्वीतलं चाकलयत्सु केषुचिद् द्रष्टुं तथेच्छत्सु परेषु पुस्तकम् ॥ तस्मिन् क्षणे सिंह इवोन्मुखः क्षमाकल्याणकः संस्कृतगर्जितं दधत् । उच्चण्डशुण्डारामिवा शु पण्डितं सम्यग्विजिग्येऽस्खलितोरुयुक्तिभिः ॥ ३ ॥ ॥

एतेन मुनिप्रकाण्डेन स्वप्नेश्वरी देव्यपि साधितासीत् । तेनाऽनाधिगम्यमपि यं कमपि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तीनां श्रीमतीनां श्रीलक्ष्मी श्रीसाध्वीनामनुमत्या स्वगुरु श्रीसिंह श्रीमहासाध्वी स्मारकत्वे-नाङ्कुरि । तभावमाससाद ।

ततश्च पूर्वोक्तानां परमगुरूणां चरणपङ्कजचञ्चरीकायमाणया प्रतापश्रिया, मानश्रिया, देवश्रिया, विमलश्रिया, प्रेमश्रिया, ज्ञानश्रिया च, अन्याभिश्च ताभिस्ताभिस्तदीयशिष्याभिः समुपदिष्टा अचरजबाई, लादूबाई, मक्खूबाई, इत्यादिकाः परमश्राविका एतन्मुद्रणोपयुक्तं द्रव्यं स्वस्वकोशात्संचित्य ददुरिति समुदितोदारभावास्ताः कथनावसरज्ञैः प्रशस्याः ।

किञ्च शैलान्तनिवासी जैनक्षात्रियगौडवंशावतंसः प्रथितकीर्तिराशिः शेरसिंह महोदयोऽपि अत्र विषये प्रशंसास्पदतामर्हति, यतोऽस्य मुद्रापणविधौ परोपकारपरायणचेतस्केनानेन सुधियाऽतिमहता प्रयत्नेन स्वकार्यजातं विहाय सहर्षं सहायता प्रदत्ता ।

एतच्च मुम्बापुरवास्तव्येन पण्डितवरराजामित्रगुरुदत्तशर्मणा शोभनरीत्यैव संशोधितम् ।

पाश्चात्यशुद्धिपत्रविधाने साहाय्यमापादयताऽनुक्रमणिकादि च विरचयता योधपुरनिवासिना तत्रत्यराजकीय पाठशाला प्रधानाध्यापकेन दाधीच दधिमथ कासल्योपाख्यधीर धुरीण

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विविधं प्रादुर्भावयांचक्रीरास्मै सा । अनेकान् किल भूमिप्रदेशान् स्वगमनेन पुनीतेनानेन तपोधनेन जयशल्यमेरुपत्तनमपि अध्यवासि तत्रैव च भैरवमूर्तिगतं यन्त्रं समुद्दधार व्याख्याच्च । तद्यन्त्रप्रभावेणैवासौ विजयमनयत्तत्रत्यं तदातनं महीपालमित्यपि कर्णाकर्णिकयाऽऽकर्ण्यते ।

तदारभ्यैव महात्मा महामहीन्द्रसंमान्यतायाः परां कोटिमाससाद । सद्धर्मपक्षपातिना विचारवतानेन पुस्तकोद्धार–धर्मशालाविधापनादीनि नानाविधानि धर्मकर्माणि संपादयांचाक्रिरे इत्यपि न खल्वज्ञातं जनानाम् । अन्येऽनेके निबन्धान्यभन्त्सत विपश्चिदपश्चिमेनानेन स्वकीयया सरलया विशदप्रतिभया ।

एवमनेन विज्ञानराशिना मुनिमहोदयेन द्वादशपर्वी व्याख्यानं च निरमायि ।

तन्नामानि त्वेतानि—

१ चातुर्मासिकव्याख्यानम् २ अष्टाह्निकाव्याख्यानं ३ दीपमालाव्याख्यानम्, ४ ज्ञानपञ्चमीव्याख्यानम्, ५ कार्तिकपौर्णिमाव्याख्यानम् ६ मौनेकादशीव्याख्यानम् ७ पौषदशमीव्याख्यानम् ८ मेरुत्रयोदशीव्याख्यानम् ९ होलिकाव्याख्यानम् १० चैत्रपूर्णिमाव्याख्यानम् ११ अक्षयतृती-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पर्व्याख्यानम् १२ द्वादशं पुनः रोहिणीव्याख्यानम् । तच्च भाषामयं विद्यते, तथा लौकिक-प्रथया द्वादशत्वेन गण्यमानमस्तीत्यत एव द्वादशपर्वी व्याख्यानमित्याख्यायते जनैः, माभू-देषा चिर प्रचारिता लोकोक्तिर्लुप्तेत्यतोऽस्माभिरपि द्वादशपर्वीव्याख्यानमिति नामैव विन्यस्तम् । एकादशपर्वीति नवत्वेनोच्यमाने च सत्वरं नोपलक्ष्यते तदीयं तदेत्पुस्तकमिति ।

एतद्ग्रंथविरचनसमयस्तु अवसानगतेन ग्रंथकारस्यैव "संवद्व्योमरसाष्टरात्रिक" इत्यादि पद्येन १८६० विक्रम संवत्सरात्मक इति स्पष्टं ज्ञायते ।

एवं शुभकर्मभिरक्षीणं स्वकीयं यशः शरीरं समुपार्ज्यासौ यशोधनो महात्मा त्रिसप्तत्युत्तराष्टादशशततमे १८७३ वैक्रमे वर्षेऽनित्यमिदमात्मीयवपुर्विहाय त्रिदिवमलञ्चकार । अतीव महिमशालि प्रचुरं चैतच्चरितमत्र विस्तरभियाऽप्रसक्ततया च विशेषेण न प्रदर्शित-मिति विज्ञेयं विज्ञैः ।

एतन्निबन्धप्रकाशनप्रयत्नस्तु श्रीखरतर गच्छाधिपति श्रीजैनाचार्य श्री १०८ श्री भूषित सुखसागर मुनिवर पट्टधर श्रीमत्त्रैलोक्यसागर महाराजानामाज्ञया, तथा महास-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पण्डित माधवात्मज—विद्याभूषण पण्डित भगवतीलाल शर्मणात्र निबन्धे समुत्साहो दर्शितः

इतःपरं यत्किमपि कथमपि कस्मिन्नपि विषये काचन त्रुटिर्भवेत्तां संशोधयिष्यन्ति परमकृपालवः साधव इति सप्रश्रयं तान्प्राति प्रार्थयते—

आश्विन शुक्ल त्रयोदशी
संवत् १९७० वैक्रमे

सत्कृपैषी

एतत्संदर्भ निर्माता

पं० भगवतीलाल शर्मा

विद्याभूषणः

एतत्पुस्तक प्राप्ति स्थानम् ( पत्ता )

श्री संघसमस्तसमुदाय,

सेठ फूलचंदजीकी धर्मशाला

फलोदी ( मारवाड़ )

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीः ॥

स्मारं स्मारं स्फुरद्ज्ञानं धाम जैनं जगन्मतम् ।
कारं कारं क्रमाम्भोजे गौरवे प्रणतिं पुनः ॥ १ ॥
निबद्धां प्राक्तनप्राज्ञैर्वीक्ष्य व्याख्यानपद्धतिम् ।
लिख्यते लेशतो व्याख्या चतुर्मासिकपर्वणः ॥ २ ॥ युग्मं ॥

इहाषाढ (१) कार्तिक (२) फाल्गुन (३) चतुर्मासकानामन्यतमे चतुर्मासिक-पर्वणि समागते सति अन्योन्यसापेक्षव्यवहारनिश्चयाभ्यां युक्तं श्रीजिनशासनं विज्ञाय

For Private and Personal Use Only

एकान्तवादनिराकरणेन आवश्यक ग्रंथोक्त समाहिताक्षर शुद्धटंकरूप्यं लक्षणचतुर्थभङ्ग-तुल्यं द्रव्यभावलिंगसंयुक्तमिच्छद्भिः स्याद्वादरुचिभिर्धर्मार्थप्राणिभिः सम्यक् धर्मकृत्यं कर्तव्यं । अत्र हि चत्वारो भंगाः प्रोक्ताः सन्ति । तथा हि । अशुद्धरूप्यमशुद्धमुद्रं (१) शुद्धरूप्यं शुद्धमुद्रं (२) शुद्धरूप्यमशुद्धमुद्रं (३) शुद्धमुद्रमशुद्धरूप्यं (४)। तत्र प्रथम भंगे चरकपरिव्राजकादयः (१) द्वितीये पार्श्वस्थादयः (२) तृतीये प्रत्येकबौद्धाः (३) अन्तर्मुहूर्तकालमगृहीतद्रव्या श्चतुर्थे साधवो द्रव्यतो भावतश्च शुद्धिभाजः (४) एतेषुचतुर्थभंग एव शुद्धत्वादुपादेय इति । अथ श्राद्धानां प्रथमतः सामान्येन किञ्चिन्नित्य कर्म उच्यते। एतद्दुरतानन्तभवभ्रमणभीरुभिर्जैनमार्गानुसारिभिः श्रद्धालुभिः सर्वदा बहुसावद्यव्यापाराः वर्जनीयाः । विशेषतः फाल्गुनादिमासेषु तिलादि धान्यं न रक्षणीयम् । वह्नत्र सजीवोत्पत्तिर्विनाशसम्भवात् । तथा संधानमाम्रफलादीनां यदि संसक्तं भवेत्तदा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्याज्यं । जन्तुभिर्मिश्रं फलं मधुकविल्वादेः पुष्पमरणिशिग्रुमधुकादेस्त्याज्यं । वर्षाकाले तंदुलीयादि पत्रशाकं न भक्षणीयम् । बहुसूक्ष्माः सजीवमिश्रितत्वादिति योगशास्त्रे हेमाचार्याः । गुर्जरादौ महाजन प्रसिद्धंतु फाल्गुन पूर्णिमात आरभ्य कार्तिकपूर्णिमां यावत् प्रायेण पत्रशाकं न भक्ष्यमिति । तथा । अतिपक्वं श्लथीभूतं चलितरसं चिर्भटिकादिफलं जीवाश्रयत्वाद्वर्जनीयं । पुनः सच्छिद्रमपरिपक्वं फलमपि जीवसद्भावात्त्याज्यमिति । एवमन्यदपि । अज्ञातफलादि यदभक्ष्यवस्तु तत्परिवर्ज्यम् । उक्तञ्च । यतः । काव्यं (श्लोकः)

अज्ञातकं फलमशोधितपत्रशाकं पूंगीफलानि सकटानि चहट्टचूर्णं ।
मालिन्यसर्पिरपरीक्षितमानुषाणामेते भवन्ति नितरां किल दोषदानि ॥

पुनर्यन्नवद्रव्यं ग्रीष्मकाले शीघ्रविनाशि भवति तत्सोपयोगेन सतां निरवद्यमेव सेव्यमिति । अथ विशेषतो अस्मिन्पर्वणि कृत्यं दर्श्यते। सामायिक (१) आवश्यक (२)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पौषधानि (३) देवार्चनं (४) स्नानं (५) विलेपनादि (६) ब्रह्मक्रिया (७) दानं (८) तपोमुखानि (९) भव्याश्चतुर्मासिकमण्डनानि ॥ व्याख्या भो भव्याः । एतानि सामायिकादिधर्मकृत्यानि चतुर्मासमण्डनानि । अलङ्कारभूतानि विद्यन्ते भवतां हि सेव्यानीति ज्ञेयम् । यद्यपि चतुर्मासकत्रयमस्ति, तथापि यदुद्दिश्य व्याख्यानं विधीयते तन्नाम ग्राह्यं न कोपि दोषः । अत्रहि कश्चित्पुमान् सामायिकं करोति कश्चित्प्रतिक्रमणं कश्चित्पौषधमित्यादि योज्यम् । यथाशक्ति एतानि कर्तव्यानि भवन्ति । न कश्चिद्विरोध इति इह प्रथमं तिथयो विलोक्याः । ते च त्रिधा तथा हि "चाउद्दसट्ठमुद्दिठ्ठ पुण्णमासिणीति" सिद्धान्ते उक्तत्वात् । मासमध्ये द्वे चतुर्दश्यौ द्वे अष्टम्यौ अमावास्या पूर्णिमा च एताः षट् चारित्रतिथयः । आसु चारित्रमाराध्यम् । शीलांगा चार्यादि गीतार्थे-रादृतत्वात् । उद्दिष्टशब्देन जिनकल्याणकतिथयः । पर्युषणादि तिथिरपिच ग्राह्या । द्वितीया



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चम्येका दृश्यो ज्ञान तिथयः।एषु ज्ञान माराध्यम्। अज्येदर्शने तिथयः तेसु दर्शनमाराध्यम्। एतावता सम्यग् दृष्टिभिर्मिथ्यात्वपरिहारेण देवपूजनं, गुरुसेवनं, जैनागमश्रवणं, धर्मक्रियानु- मोदनं, तीर्थयात्राकरणं, जिनकल्याणकभूमिस्पर्शनादिभिस्सततं सम्यक्त्वं निर्मलं कार्यमिति। उक्तं च। "जम्मं दिरकानाणं तिच्छय राणं महानुभावाणं। जच्छय किरनिव्वाणं आगाढं दंसणं होइ १"—इति प्रसंगत उक्तं। प्रथमं सामायिकस्वरूपमुच्यते। समस्य रागद्वेषरहि- तस्य सतो जीवस्य अयोज्ञादीनां लाभः प्रशमसुखरूपः समाय तदेव सामायिकं मनोवाक्काय- चेष्टापरिहारेण मुहूर्तं यावत् सर्ववस्तुषु समपरिणाम इत्यर्थः। उक्तं च "निन्दा पसंसासु समो- समोपमाणावमाणकारीसु। सम सयण परियणमाणो सामाइय संग उज्जीवो ॥१॥ जो समो सब्ब भूएसु तसेसु थावरेसु य। तस्स सामाइयं होइ इमं केवलि भासियं ॥२॥" सामायिकस्थितो हि श्रावको गृहस्थोपि यतितुल्यो भवति—तदुक्तं "सामाइयम्मिय करा समणो इव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





साव उहव इजम्मा । एएण कारणेणं बहुसो सामाइयं कुज्झा. ॥ १ ॥" अतएव सामायिकस्थस्य देवस्नानपूजनादावप्यधिकारो नास्ति । सामायिक रूपे भावस्तवे प्राप्ते सति द्रव्यस्तत्कारणा नौचित्यात् सामायिकस्य दुर्लभता यथा । "सामाइय सामग्गि देवा चिन्तान्ति हि यय माझ्झमि । जइ हुइ मुहुत्तमेगं ता अह्म देवत्तणं सुलहं" १ ॥ इति । इह सामायिककर्ता श्रद्धालुर्द्विविधः ऋद्धिमान् अनर्द्धिश्च, तत्र यः ऋद्धिमान् अनर्द्धिश्च । तत्र यः ऋद्धिरहितः सः साधुसमीपे जिनगृहे पोषधशालायां स्वगृहे वा निर्विघ्ने स्थाने सामायिकं कुरुते । यस्तु राजादिर्महर्द्धिकस्तस्य सामायिकविधानं महताडम्बरेणो पाश्रयमागत्य यत ईदृशापि सामायिकं कुर्वन्ति इति लोके जिनशासनस्य महाप्रभावना संजायते इति । अथ सामायिकस्याष्टौनामानुच्यते । "सामाइयं (१) सम इयं (२) सम्मं वा उ (३) समास (४) संखेवो ॥ (५) अणवझ्झं (६) च परिणा (७) पच्चरकाणे



For Private and Personal Use Only

( ८ ) यते अठ ॥ १ ॥ " व्याख्या सामायिकं समभावः १ समायिकं सम्यग् दयापूर्वकं सर्वजीवेषु प्रवर्तनं २ सम्दग्वादो रागद्वेषभयादिपरिहारेण यथावस्थितकथनं ३ समासः स्तोकाक्षरैः कर्मनासकस्तत्वावबोधः ४ संक्षेपस्तोकाक्षरा महार्थाद्वादशाङ्गी ५ अनवद्यं निष्पापाचरणं ६ परिणा पापत्यागात्समन्ताद्वस्तुज्ञानं ७ प्रत्याख्यानं परिहारिणीद्वस्तु-त्यागः ८ इत्यष्टौ नामानि । अथैषां क्रमेणाष्टौ दृष्टान्ता दर्श्यन्ते। तत्रादौ दमदन्तदृष्टान्तो। यथा ॥ हस्तिशीर्षनगरे दमदन्तो ( नाम ) राजा ( आसीत् ) तस्य च एकदा हस्तिना-पुरस्वामिभिः पांडवैः कौरवैश्च सह सीमानिमित्तो महान् विवादः संजातः। तदनन्तरं कियद्भि-र्दिनैर्दमदन्ते जरासंधनृपसेवार्थं गते सति पाण्डवैस्तद्देशो भग्नः। तदा तां वार्ता श्रुत्वा क्रुद्धो दमदन्तः सद्यो बहुसैन्यमादाय हस्तिनापुरोपरि समायातस्तत्र चोभयेषां परस्परं महद्युद्धं संजातं । परं दैववशात्पाण्डवाः कौरवाश्च भग्नाः । दमदन्तस्तु विजयं प्राप्य स्वस्थानं गतः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत एकदा स नृपः संध्यायां पञ्चवर्णजलदस्वरूपं दृष्ट्वा संप्राप्तवैराग्यः संसारमपिताद्द-
शमेवासारं विभावयन् प्रत्येक बुद्धितया प्रव्रजितः। ततः प्रतिग्रामं विहरन् हास्तिनापुरे
प्रातोल्या बहिर्देशे कायोत्सर्गेण तस्थौ। तदा राजवाटिकां गच्छद्भिः पाण्डवैर्मार्गे तं मुनिं
विलोक्य लोकमुखाद्दमदन्तं राजर्षिं तं विज्ञाय सद्यो अश्वेभ्य उत्तीर्य विधिनाभिवन्द्य तस्य
द्विविधमपि बलं प्रशस्य चलिताः। तदनन्तरं तेनैव मार्गेण गच्छन्तो दुर्योधनप्रमुखा
कौरवा अपि तथैव तं दमदन्तं विज्ञाय बहुभिर्दुर्वाक्यैस्तं तिरस्कृत्य बीजपूरकफलमेकं
तदुपरि प्रक्षिप्य गताः ततो यथा राजा तथा प्रजेतिन्यायात् तदनु गच्छद्भिः सर्वै-
रपि सेवकैः काष्ठपाषाणादिनिक्षेपान्मुनेः समन्तादुच्चैस्तरं चत्वरमिव कृतः। अथारामतः
प्रत्यागच्छन्तो पाण्डवास्तस्यैव मुनेः स्थाने तन्महच्चत्वरं दृष्ट्वा लोकेभ्यः प्रश्नपूर्वकं तत्सर्वं
कौरवकृतं दुश्चेष्टितं ज्ञात्वा सद्यस्तत्रागत्य पाषाणादिदूरीकरणपूर्वकं तं दमदन्तं प्रणम्य



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वस्थानं गताः । तदा पांडवैरित्थं सम्मानितो कौरवैरपमानितश्च स मुनीन्द्र उभयत्र समभावमकरोन्मनागपि रागद्वेषादिकं न कृतवानिति समभावे दमदन्तवृत्तान्तः ॥ १ ॥

अथ दयापूर्वकप्रवृत्तौ मेतार्यदृष्टान्तो यथा । मेतार्य (नामा कश्चित्) मुनिः प्राग्भवाचरितदुरितवशात् राजगृहनगर्यां चाण्डालकुले समुत्पन्नः । चाण्डाल्या च जन्मसमय एव मृतवत्सायै धनदश्रेष्ठिपत्न्यै प्रच्छन्नमर्पणात्तद्गृह एव वृद्धिं प्राप्तः क्रमेण यौवने प्राप्ते प्राग्भवमित्रदेव साहाय्यादष्टौ श्रेष्ठिकन्याः पुनश्चैकां श्रेणिकनृपपुत्रीञ्च परिणीतवान् । ततो द्वादशवर्षान्ते देववचनात् श्रीवीरप्रभुसमीपे प्रव्रज्यामादाय बहुदेशेषु विहरन्नेकदा (तस्यामेव) राजगृहनगर्यां स्वर्णकार गृहे भिक्षार्थं प्राविष्टः । तदा स्वर्णकारे भिक्षानयनार्थं स्वगृहे प्रविष्टे सति श्रेणिकनृपस्य देवपूजानिमित्तं तत्कृता अष्टोत्तरशतप्रमिताः स्वर्णयवाः क्रौञ्चपक्षिणा भक्षिताः स च क्रौञ्चः उड्डीय भित्तेरुपरि स्थितः । तावत् स्वर्णकारोपि (गृहाभ्यन्तरत)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शुद्धाहारमानीय बहिः समागतस्तत्र तान् स्वर्णयवानपश्यन् तमेव साधुं तच्चौरं मन्यमानो जगाद । भो साधो ! इहस्था यवाः केन गृहीताः (इत्याकर्ण्य) साधुना चिन्तितं यदि पक्षिणा भक्षिता इति वक्ष्ये तर्हि मद्वचनादेवायं एनं क्रौञ्चं हनिष्यति एवं विचिन्त्य मौनमेवाश्रित्य स्थितः । तदातिरुष्टेन स्वर्णकारेण साधोः कण्ठे पाशो धृतस्तेन तस्य चक्षुषी निःसृत्य बहिःपतिते । तयैव वेदनया स साधुः असकृत्केवलीभूत्वा मुक्तिं प्राप्तः । इत्थं प्राणान्तोपसर्गेपि मेतार्यमुनिना जीवदयैव मनसि धृता न किमप्यन्यच्चिन्तितम् । एवमन्यैरप्याचरणीयम् । इति समयिके मेतार्य दृष्टान्तः ॥ २ ॥

अथ सत्यवादे कालिकाचार्यदृष्टान्तो यथा । तुरमणीनगर्यां कालिकाचार्याणां भागिनेयेन दत्तनाम्ना पुरोहितेन बलात्स्वकीयं नृपं कारागारे निःक्षिप्य स्वयं राज्यभारं बिभ्रता एकदा मातृप्रेरणया आचार्यसमीपं गतेन तेनैव दत्तेनोन्मत्त



For Private and Personal Use Only

प्रभुतया धर्म्मेर्ष्यया च सक्रोधं श्रीगुरुभ्यो यज्ञफलं पृष्टे साति गुरुभिर्धैर्य मवलम्ब्य "यज्ञो हिंसायाः फलं नरक" मिति सत्यमेव वचः प्रोक्तम्। न पुनरन्यथा। ततः कोत्र प्रत्ययः इति तेन पुनः पृष्टे साति सूरिणोक्तं तस्मिन्नेव इतः सप्तमे दिने तव मुखे अकस्माद्विष्टा पतिष्याति ततोति क्रुद्धेन दत्तेनोक्तं त्वं कथं मरिष्यसि। गुरुणोक्तं। अहं समाधि नैव मरिष्यामि मृतोपि च स्वर्गं गन्तास्मि। तदा दत्तः हुंकृतिस्सन् तत उत्थाय सूरिभिः स्वभटैः रक्षितो स्वगृहमागत्य प्रच्छन्नं स्थितः। ततः स दत्तो मतिमोहात्सप्तममपि दिनमष्टमं मन्वानः अद्याचार्यप्राणैः शान्तिकं कुर्वे इति विचिन्त्य गृहान्निर्गतः। तदा एको मालिकः पुर्यां प्रविशन् कार्याकुलत्वात् राजमार्गे एव मलोत्सर्गं कृत्वा तन्मलं पुष्पैराच्छादयामास। तावत्तत्रैव मार्गे गच्छतो दत्तस्य अश्वखुरः क्षिप्त्वा साविष्टा मुखे पतिता तदास्वादतश्चमत्कृतो तत्सप्तमं दिनं विज्ञाय विषण्णः सन् पश्चान्निवृत्तः। तदा एतस्य बहुविधदुरा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चारेण खिन्नैर्मूलमंत्रिभिर्जितशत्रुर्नृपः पञ्जरान्निष्कास्य राज्ये स्थापितः दत्तस्तु बला द्बध्वा राज्ञे समर्पितो राज्ञा च शंकुभ्यां प्रक्षिप्य अधोग्निं प्रज्वाल्य श्वानान्विमुच्य कदर्थित-स्तेन मृतो नरकं प्राप्तः । आचार्यस्तु बहुधा सम्मानितः । इति कालिकाचार्यसत्योक्तौ दृष्टान्तः ॥ ३ ॥

अथस्तोकाक्षरैर्महातत्वज्ञाने विलातिपुत्रदृष्टान्तः । यथा । राजगृहनगर्यां धनदत्तनामा व्यावहारिक स्तस्य चत्वारः पुत्राः सुसुमा नामैका पुत्री विलाती नामैको दासश्चासीत् । एकदा स श्रेष्ठी स्वकीयमेकं पुत्रं दुराचारिणं विज्ञाय गृहाद्बहिर्नि-ष्कासितवान् । सोपि ततो निःसृत्य चौरपल्ल्यांगत्वा स्थितः अथान्यदा स विलातीपुत्रो बहुभिश्चौरैस्सह चौर्यार्थं राजगृहनगर्यां गत्वा तत्र स्वयं तच्छ्रेष्ठिगृहं प्रविश्य सुसमा नाम्नीं कन्यामादाय तूर्णं गृहान्निर्गतस्तावत् स श्रेष्ठिरपि कन्यानयानार्थं पुत्रैस्सहित



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तदन्वधावत् । एवं कियति मार्गेतिक्रान्ते श्रेष्ठिनमत्यासन्न मागतं वीक्ष्य भीतेन विलातीपुत्रेण सुसमामस्तकं छित्वा करे प्रगृह्य द्वितीयकरे च रुधिरालिप्तं खड्गमादाय पर्वतोपरि आरुरुहे । स श्रेष्ठी तु तत्स्वरूपं दृष्ट्वा विषण्णः सन् प्रत्यगात् । अथ विलातीपुत्र एतादृशेन भयंकररूपेण गच्छन् मार्गे कायोत्सर्गार्थं कमपि साधुं स्थितं विलोक्यमित्थमुवाच । भो मुण्डिन् ! धर्मं कथय नोचेदनेनैव खड्गेन तवापि शिरश्छेत्स्ये । साधुरस्यैतादृशं भीषणरूपं दृष्ट्वा झटिति "नमो अरिहन्ताण" मितिपदमुच्चार्य आकाशे उड्डीय उपशम (१) विवेक (२) संवरे (३) तिपदत्रयात्मकं धर्मं तदग्रे चोक्त्वा निर्गतः । निर्गते साधौ विलातीपुत्रस्तदर्थं चिन्तयन् स्वात्मनि तन्मध्यगमेकमपि गुणमपश्यमानः तत्प्राप्त्यर्थं समपरिणामें धृत्वा करस्थखड्गादिकं तत्रैव परित्यज्य मुनिस्थाने एव कायोत्सर्गार्थं तस्थौ । तदा तच्छरीरालिप्तरुधिरादिगंधादुपागतेन



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कंटिकगणेन तच्छरीरं सछिद्रं कृतं परं स मनागपि न चचाल । तृतीये दिने तत्रैव देहं विमुंच्य स्वर्गं प्राप्तः । इति समासे विलातीपुत्र दृष्टान्तः ॥ ४ ॥

अथस्तोकाक्षैरेर्महार्थ कथने लौकिकः पण्डितचतुष्टयदृष्टान्तो यथा । वसन्तपुरे जितशत्रु राजा तस्यैकदा शास्त्रश्रवणेच्छासीत् तदा चतुर्भिः पण्डितैः श्लोक लक्षप्रमितमेकैकं ग्रंथं निर्माय नृपाय निवेदितं । तद्दृष्ट्वा नृपेणोक्तं । इमे ग्रंथास्त्वाति महान्तः नह्यल्पकालेन श्रोतुं शक्यास्तस्मात् स्वल्पाक्षैरेरेवैतेषां सारमात्रं वदतः । तच्छ्रुत्वा तैश्चतुर्भिः पण्डितै स्तच्छारभूतश्लोकमेकं निर्माय नृपाग्रे प्रोक्तं । तथा हि । "जीर्णे भोजनमात्रेयः कपिलः प्राणिनां दया । बृहस्पतिरविश्वासः पञ्चाल स्त्रीषु मार्दवं ॥ १ ॥–"—व्या० आत्रेय नामा विद्वान् वक्ति । प्रथम भुक्ते आहारे जीर्णे सति पुनर्भोजनं कार्यमिति वैद्यकग्रंथ सिद्धान्तः । कपिल पंडितः प्राह । सर्वेषां प्राणिनां दया कार्या इति धर्मशास्त्र परमार्थः ।





For Private and Personal Use Only

बृहस्पतिः कथयति स्त्रीषु विश्वासो नाविधेय इति नीतिशास्त्रसिद्धान्तः । पञ्चालपण्डितो ब्रूते । स्त्रीषु मृदुत्ता धार्येति कामशास्त्ररहस्यम् । एवं स्तोकाक्षरैर्बह्वर्थकथनं द्वादशाङ्गी रूपं संक्षेपेण सामायिकं बोध्यम् ॥ ५ ॥

अथ निष्पापाचरणे धर्मरुचि साधु दृष्टान्तो यथा । धर्मघोषाचार्यस्य शिष्यो धर्मरुचिनाम साधुर्नगरे भिक्षार्थं भ्रमन् रोहिण्याख्यायाः ब्राह्मण्याः गृहं प्रविष्टस्तया च भ्रान्त्या निष्पादितं विषप्रायं विज्ञाय दुष्ट बुध्यासाधवेदत्तं साधुना सरलस्वभावेनतद्गृहीत्वा स्वस्थाने आगत्य गुरुभ्यो दर्शितं गुरुभि स्तदृष्ट्वा कटुकतुंबिकाशाकं प्रोक्तं भो महाभाग ! इदं शाकं विषप्रायमस्ति अतः कस्मिंश्चिन्निर्भनुजस्थाने गत्वा ग्रामाद्बहिः स्थंडिले स्थापयतु भवान् । धर्मरुचि स्तथेत्युक्त्वागुर्वाज्ञया निरवद्य भूमौ गत्वा यावत्ततशाकं स्थापयतुं लग्न स्तावत्तन्मध्यात्पतिते कस्मिंश्चिद्बिन्दौ गन्धाकृष्टाः बव्हयः कीटिकाः संमिलितास्तद्रसग्रह-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णेनैव सद्यो मृताः । तद्बहुकीटिकामरणं दृष्ट्वा पापभीरुस्साधुर्जीवदयां चिन्तयन् अस्य शाकस्य गंधेन मा कोपिजीवधारी मृत्यु भाग्भवत्विति बुध्या स्वयमेव तत्सर्वं शाकं भक्षितवान् ततः सद्यो मृत्वा सद्गतिं प्राप्तः इति निष्पापाचरणे धर्मरुचिदृष्टांतः ॥ ६ ॥

अथ पापत्यागेन यद्वस्तुतत्वज्ञानं तत्र इलापुत्रदृष्टांतो यथा इलानगरे धनदत्तश्रेष्ठी तस्य इलादेवीसेवनात् इलापुत्रो जातः स चैकदा तत्रागतानां विदेशीयनटानां नृत्यं पश्यन् अतिसुंदररूपां काचन नर्त्तकपुत्रीं विलोक्य प्राग्भवस्नेहात्तस्यामत्यंतानुरक्तो बभूव । ततः गृहमागत्य पितरं प्रति उवाच भोतात ! मांप्रतितामेव नर्त्तकपुत्रीं परिणय नोचेन्मरणं शरणीकरिष्ये परमपरकन्यापाणिग्रहणं सर्वथा न विधास्यति पितातस्यात्याग्रहंविज्ञाय कथमपि निषेध्दुमशक्नुवता वृद्धनटसमीपं गत्वा तत्पुत्री मार्गिता नटेनोक्तं यद्यस्मत्कलां शिक्षयित्वा बहुधनमेकीकृत्य अस्मद्ज्ञातिं पोषयेत् तर्हिअस्मत्पुत्र्याः पाणिग्रहणं कुर्यात्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रेष्ठिना तद्वचः श्रुत्वा इलापुत्र समीपमागत्य नटोक्तमभिप्रायं प्रोक्तम् इलापुत्रस्तदप्यंगीकृत्य हठेन गृहान्निर्गतः नटेषु मिलितः ततः। कियता कालेन तेषां सर्व कलासु निपुणोभूत्वा वेनातटनामनगरं प्राप्तस्तत्र राज्ञे स्वकलादर्शनाय स्वयं वंशमारुह्य रमते स्म। अथ तद्देशाधिपतिस्तत्पार्श्वस्थां तामेव सुन्दरीं विलोक्य चलितचित्तः सन् ह्यचिन्तयत्— अहो सुन्दरीयं नट भार्या यद्येष इलापुत्रो वंशान्निपत्य म्रियते चेदेतामहं गृण्हीयाम्। एवं चिन्तयति नृपे इलापुत्रः सर्वा एव कलाः कृत्वा वंशादुत्तीर्य पारितोषिकादानेच्छया नृपमभिवाद्य द्रव्यमयाचत। नृपस्तु तदाकर्ण्योवाच, यतऽव्यग्रचित्तेन मया सम्यक् कला न दृष्टा अतः पुनरेव नृत्यादिकं विधीयताम्। इति राजाज्ञां श्रुत्वा पुनस्तत्सर्वं नृत्यमकरोत् किन्तु तस्य मरणमेवेच्छता राज्ञा पुनरपि तथैवोक्तम् नटस्तृतीय वारं वंशमारुह्य रमते स्म। तस्मिन्नेवावसरे कस्यचिद्भाग्यवतः श्रेष्ठिनः गृहे एकः साधु-

For Private and Personal Use Only

भिक्षार्थमागतः तदा तस्य श्रेष्ठिनः भार्या सर्वालङ्कारभूषिता अतिसुन्दराङ्गी तमागतं विलोक्य सद्यः समुत्थाय मोदकैः स्थालं प्रपूर्य तस्मै न्यवेदयत्। अथ च स साधुर्नासाग्रदृष्टि-मनागपि मनसिविकारमकुर्वाणः यथेच्छमाहारं गृण्हाति स्म । अनयोर्द्वयोरेवैतादृशी वृत्तिर्वंशारूढेन तेन नटेन दृष्टा। तदासौ स्वयं नृत्यकार्यमग्नोपि तयोर्निर्विकारभाव दर्शनात सद्यः सम्प्राप्तवैराग्यो अनित्यादिभावनां भावयन् केवलज्ञानं प्राप। अन्ये नृपादयोपि तत्स्वरूपदर्शनात् प्रतिबुद्धाः इति परिज्ञाने इलापुत्रदृष्टान्तः ॥ ७॥

अथपरिहरणीय वस्तुत्यागे तेतलिपुत्रदृष्टान्तो यथा । तेतलिनाम्निकस्मि-श्चिन्नगरे कनककेतुर्नाम राजासीत् स च राज्यलोभाज्जातमात्रानेव पुत्रान् विनाशयाति। तस्य तेतलिपुत्रोनामात्यस्तस्य पोट्टिला नाम भार्याऽऽस । सा च पूर्वं मंत्रिणोतीव वल्लभासीत् परन्तु कियता कालेन कथंचिदनिष्टा जाता. एकदा तस्या गृहे आहारार्थं काचित्सा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ध्वी उपागता, मन्त्रिपत्न्या तां प्रणतिपुरस्सरं सत्कृत्य भर्तृवशीकरणोपायः पृष्टः । साध्व्या चोक्तं "धर्मः सेव्यो येन सर्व एवेष्टार्थाः सिद्धयन्ति" इतिश्रुत्वा मन्त्रिपत्नी संसाराद्विरक्ता सतीदीक्षाग्रहणार्थं पतिं पप्रच्छ। मन्त्रिणोक्तं दीक्षां गृहाण परं यदित्वं देवपदं प्राप्नुयास्तर्हि मां प्रतिबोधयेस्तयापि तद्वचोऽङ्गीकृत्य दीक्षा गृहीता । अथ कियता कालेन शरीरं विहाय देवपदं प्राप्ता । अथ कदाचिन्मन्त्रिणा जातमात्र एव राज्ञः पुत्रो प्रच्छन्नं गृहीत्वा स्वगृहे वर्द्धितः । एकदा परलोकं गते तस्मिन् कनककेतुनृपे स एव कनकध्वजनामा राजकुमारः मन्त्रिणा राज्ये स्थापितः। तेन कनकध्वजेनतु सर्व मेवराज्य कृत्यं तस्याधीनं कृतं । स च तेतालिपुत्राख्यो मन्त्री अहर्निशं राजकार्ये मग्नः कदापि धर्मकृत्यं न करोति । अथ पूर्वप्रतिज्ञानुसारेण धर्मच्युतं स्वपतिं विज्ञाय सैव पोट्टलिका तं प्रतिबोधयितुमचिन्तयत् । एकदा दैववशात् मन्त्रिण उपरि राजा कुपित॰ किन्तु मन्त्रिणा तन्न ज्ञातम्।अथ प्रभाते राजकार्यार्थं मन्त्री राज-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सभा गतवान् परं तदागमनं निरीक्ष्यापि तस्मिन् दिने सर्वएव सभ्याः प्रत्युत्थानादिकमविधाय प्राङ्मुखा बभूवुः न केनापि सत्कृतः। एवं स्वकीयापमानं विलोक्य खिन्नमनाः सद्य एव स्वगृहमागत्य आत्मनः कुमरणाशंकया स्वहस्तेनैव अनेके मरणप्रयोगाः कृताः परं दैवेन सर्वं एव वैयर्थ्यं नीताः। ततोविमनाभूय स्थितं मन्त्रिणं तया पोट्टिलिकयैव प्रहितस्तत्प्रतिबोधाय देवः प्रादुर्भूय उवाच भोमन्त्रिन्! खेदं मा कुरु ईदृग्विधं संसारस्वरूपं विद्यते तत्वतस्तु न कोपि कस्य स्वजनोस्ति इत्यादि वाक्यैस्तं प्रतिबोध्य देवः स्वस्थानं ययौ। मन्त्री अपि सर्वविभवं परित्यज्य सद्यो दीक्षां गृहीतवान्। इति प्रत्याख्याने तेतलिपुत्रदृष्टान्तः ॥ ८ ॥ इति सामायिकपदं व्याख्यातं। इत्याद्यं व्याख्यानं।

अथावश्यकपदं व्याख्यायते तत्रोभयकाले तदवश्यं कर्तव्यं तदेवावश्यकं प्रतिक्रमणमित्यर्थः। तत्फलं तु "आवस्स एण एएण सावउ जइ विहुरउ होई। दुरकान मन्ताकि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रियं काही अचिरेण कालेण" । व्याख्या । श्रावको यद्यपि बहुरजस्को बहुपापयुक्तो भवति तथापि एतेनावश्यकेन कर्मणा स्तोकेनैव कालेन दुःखानामन्तक्रियां विनाशं करिष्यति इति । किञ्च "आवस्स उभयकालं उसहमिव जे करंति उज्झत्ता । जिणु विज्झकाहिय विहिणा अकम्म रोगायते हुंति" व्याख्या येश्रावका उपयोगयुक्ता संतः प्रभातसंध्याकाले जिनवैद्यकथितविधिना सम्यक् प्रकारेण औषधिमिवावश्यकं कुर्वंति ते कर्म रोगरहिता भवंतीति ॥ २ ॥

प्रतिक्रमणनियमे साजणसिंहदृष्टांन्तः स चैवं साजणसिंहनामा श्रेष्ठी द्विसंध्यकालवेलायां प्रतिक्रमणं विना भोजनं न कार्यमिति नियमवान् बभूत एकदा फीरोजपतिसाहनाम्नोनृपेण कस्यचिदपराधवशात् कारागारे क्षिप्तस्तदा तत्र स्थितेनापि तेनारक्षकपुरुषेभ्यः पञ्चाशन्मितान् सुवर्णनिष्कान् दत्वा प्रत्यहं प्रतिक्रमणं कृतः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







एकदा तदेतादृशीं धर्माभिरुचिं श्रुत्वा प्रसन्नेनराज्ञा रत्नद्वयपरिक्षण व्यतिकरे तृतीयरत्नं जगन्मध्ये त्वमिति वचनात्प्रसन्नेन सुरत्राणेन स मुक्तः सम्मानितश्च तदा भीतैरारक्षकैर्निष्काः प्रत्यर्पिताः परंतु श्रेष्टिना ते निष्कास्तेभ्य एव दत्ताः प्रोक्तं च अहो एतद्धनं कियत् यतो अमूल्यं प्रतिक्रमणं मया कृतं भवत्साहाय्यादिति दृष्टांतः ।

अथ पौषधं व्याख्यायते धर्मस्य पोषं पुष्टिं यद्धत्तेतत्पौषधं तत्राहार १ शरीरसत्कार २ गृहव्यापार ३ आब्रह्मनिवृत्ति रूपं ४ बोध्यं तत्फलं चेदं “पोसपहि य सुहे वोसह भावे असुहा इषवेइनित्थ संदेहो। च्छिदेइ निरय तिरय गइ विहि अप्पं मत्तेण” पौषध व्रतास्थिरत्वे कामदेवदृष्टांतः यथा ।

कामदेव श्रावकः पौषधेस्थितः सन् निशायां तस्य दृढप्रेमपरीक्षकेन दैवेन दुष्टगज १ नाग २ पिशाच ३ रूपैर्बहुधा क्षोभितो मनोवाक्कायैर्मनागपि न क्षुभित इति ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ देवार्चनस्नान विलेपनानि व्याख्यायंते देवस्य श्रीजिनेन्द्रस्य तत्प्रतिमायाश्च अर्चनं वासादिना स्नानं जलादिना विलेपनं चंदनादिना कर्तव्यं एतत्पदत्रयेण सर्वोऽपिपूजा प्रकारः सूचितः पूजाफलं चेदं " सयंपमज्झणे पुन्नं सहस्सं च विलेवणे सहसाद्दास्सियामाला अणंतं गीय वाइयं ॥ १ ॥ इत्यादि

अत्र दृष्टांताः स्वयं वाच्याः अथ ब्रह्मक्रिया १ दान २ तपो ३ मुखानि व्याख्यायंते । तत्र ब्रह्मक्रिया ब्रह्मचर्यं सुदर्शनश्रेष्ठयादिवत् शीलव्रतपालनमित्यर्थः तत्फलं यथा "जो देह कणय कोडी अहवा कारे इ कणय जिणभवणं तस्स न तत्तियपुन्नं जत्तिय बंभव्वरा धरिये ॥ १ ॥" इति दानं हि अभय १ सुपात्र २ अनुकंपो ३ वित्त ४ कीर्त्त ५ भेदात्पंचविधं तत्र द्वाभ्यां मोक्षः त्रिभिर्भोगप्राप्ति इह अभयदाने दृष्टान्तो यथा।

एकदा राजगृहे सभास्थितेन श्रेणिकनाम्ना नृपेण सभ्येभ्यः मन्त्रिभ्यः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रति चोक्तं यत् "संप्रति नगरे सर्वेष्वपि वस्तुषु किं वस्तु सुलभं स्वादु चास्ति"। तच्छ्रुत्वो त ऊचुः। मांसं सुलभमस्ति स्वादु च तदेव। तदाकर्ण्य नृपेण चिन्तितं यदिमे क्षत्रिया स्तुनिर्दयाः अतः पुनरप्येवं न जल्पेयुरित्येवं विधास्य। अथ कियति काले गते एकदा तदेव चिन्तयन् रात्रौ सर्वेषां तेषां क्षत्रियाणां गृहेषु पृथक् पृथक् गत्वा राजा एकमवादीत् "भो क्षत्रियाः! अस्मद्राजकुमारशरीरे अद्यैव काचिन्महाव्याधिरुत्पन्ना अतस्तस्या शान्त्यै वैद्यैरेवमुक्तं यदि टंकद्वयमितं मनुष्यमांसमस्मै दीयेत तदायंजीवेत. नान्यथास्यजीवनोपायः। अतः यूयं राज्ञोग्रासजीविनस्तद्भवाद्भिरेव एतत्कार्यं कर्तव्यं। तच्छ्रुत्वा तेनोक्तं भगवन्! न हि स्वमांसप्रदातुं मामकी शक्तिरस्ति अतस्त्वं मत्तः स्वर्णमुद्रासहस्रंगृहाण परमस्मै प्रयोजनायान्यत्र एव गच्छ। राजा च तदाकर्ण्य मुद्रासहस्रंगृहीत्वा अन्यत्रापरस्य गृहे अगच्छत्। तदा श्रुतमात्रेणैव तेनापि मुद्रासहस्रंप्रदत्तं। एवं प्रत्येकस्य गृहे परिभ्रमन्

॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तैर्दत्तं बहुधनमादाय प्रभाते समागत्सु सर्वेषु तत्सर्वं धनं दार्शितं । प्रोक्तं च भोः भोः क्षत्रियाः ! यूयं गतदिने कथमेवमबदतयन्मांसं सुलभमिति मया तु टंकद्वयमितमपि मनुष्यमांसं एतावता द्रव्येनापि न लभ्यते । तच्छुत्वा सर्व एव लज्जिता बभूवुः । अत्रार्थे श्लोकः "स्वमांसं दुर्लभं लोके लक्षेणापि न लभ्यते अल्पमूल्येन लभ्येत पलं परशरीरजं" ॥१॥

अतः सर्वैरेव इति बुध्द्वा अभयदान बुद्धिर्धार्या ॥ इति ॥ तपोहि दुष्टाष्टकर्म विनाशकं सकल लब्धिजनकं बाह्याभ्यन्तरभेदेन द्वादशविधं दृढप्रहारादिवद्भव्यात्माभिः समाचरणीयं । तपोमुखानि इत्यत्र मुखशब्दस्त्वाद्यर्थकस्तेन भावनादि परिग्रहः इति ! व्याख्यातं अत्र ब्रह्मक्रियादिपदं किं च । अत्रधर्मार्थिना आत्मनिन्दा कर्तव्या न तु परेषां निन्देति । तत्र चित्रकारपुत्री दृष्टान्तो यथा ।

काञ्चन पुराधीशेन जित शत्रुनाम्ना राज्ञा स्वस्य नवीन सभायां कस्याश्चित् कनकमञ्जरी



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाम्न्याश्चित्रकार पुत्र्याः निर्मितं चित्रमयूरमतीव सुन्दरं साक्षान्मयूरमिव दृष्ट्वा तच्चातुर्य-
गुणरञ्जतस्तेन राज्ञा सैव चित्रकारसुता परिणीता । तया च स्वबुद्ध्या प्रत्यहं नव्य नव्य
कथाकथनेन स नृपः षण्मासान् यावत् स्वावासे एवानीतः । तदा राज्ञा बहुमानिता अपि
सा स्वगृहस्यैकान्तदेशे उपविश्य पितृगृहसम्बन्धि सामान्यवेषं परिधाय "हे आत्मन्! राज-
मान्यत्वमस्थिरमस्ति अतोऽहंकृतिर्न विधेया तवपितृगृह सम्बन्धिनीतियमृद्धिरस्ति" इत्यादि
वचनैरात्मानं निन्दातिस्म । अथैकदा छलं पश्यन्तीभिस्सपत्नीभिस्तथाकुर्वाणां तां विलोक्य
नृपायोक्तं यदेषा भवतां वशीकरणाय किमपि तान्त्रिकं कर्म प्रत्यहं करोति ततो राज्ञा
परीक्षार्थमेकदाकस्मादागत्य तामात्मनिन्दां कुर्वाणां विलोक्य तुष्टेन पट्टराज्ञी कृता ।
अपराः सर्वा एव पत्न्यश्चापमानिताः । एवं धर्मार्थिभिरात्मनिन्दा कार्या इति ।

अन्यच्च । चतुर्मासिकपर्वाराधयितुं कामैर्भव्यात्माभिरस्मिन्दिने स्वस्वातीचाराः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शंसा ५ संलेखनं कृत्वा यद्येवं चिन्तयति तदातीचाराः एव च यदि कोपि कालत्रय सम्बंधी अतीचारोलग्नो भवेत्तदा तस्य मे मिथ्या दुष्कृतमिति संघादिसमक्षं वाच्यम्। एवमग्रेपि बोध्यम्। अथ पञ्चदश कर्मा दानातिचारा यथा। आजीविकादि निमित्तम् काष्टदहनेनाङ्गारादिकरणं तद्विक्रयणम् इष्टकादि पाचनमित्यादि अंगारकर्म १ विक्रयार्थं वृक्षादेः पुष्पादिच्छेदनम् वनकर्म २ शकटानां तदङ्गानि च निष्पादनं शकटकर्म ३ शकटवृषभादीनां भाटकेन जीवनं भाटककर्म ४ हल कुद्दालादिभिर्भूमिविदारणं, पाषाणादि घटनं, यवादि धान्यानां सक्तवादिकरणं स्फोटककर्म ५ प्रथमत एव म्लेच्छादिभ्यो मूल्यदानेन गजदन्तादिकमानाय्य विक्रयणं यद्वा स्वयमानीय विक्रयो दन्तवाणिज्यं ६ लाक्षानीलीमनःशिलादीनां विक्रयो लाक्षा वाणिज्यम् ७ मद्यमांसघृतादीनां विक्रयो रसवाणिज्यम् ८ यस्य भक्षणात् प्राणधारी म्रियते तद्विषं तस्य विक्रयो विषवाणिज्यम् ९ द्विपदचतुष्पदा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समालोचनीयाः गुर्वादीनां समक्षं तेषां मिथ्या दुष्कृतं वाच्यं। तत्र साधूनां चरणसप्तति (७०) करणसप्तति (७०) मिलनात् चत्वारिंशदधिक शत (१४०) मतीचारा भवन्ति। ते च ग्रंथगौरवभयान्न लिखिताः। श्रावकाणान्तु चतुर्विंशत्यधिक शत (१२४) मतीचाराः सन्ति ते च संक्षेपतो दर्श्यन्ते "पणसंलेहण (१) पन्नरसकम्म (१५, २०) नाणाइ अठयन्नेयं। बारस तव (१२, ५६) विरियति गं ३, ५४ पणसम्म (५, ६४) वयण पत्तेयं (६०, १२४) ॥ १ ॥" व्याख्या। संलेखनायाः पञ्चातीचारास्तथाहि। अत्र इतरस्तप प्रभावादहं मनुष्यो राजादि भूयासमिति इह लोकाशंसा १ इतो अनुष्ठानात्परलोके देवो भूयास मिति च इहलोकाशंसा २ कृतानशनोहं लोके पूज्योस्मि अतश्चिरं जीयासमिति जीविताशंसा ३ अपूज्यत्वाद् व्याधि पीडितत्वात् शीघ्रं म्रियेचेद्वरमिति प्रार्थनं मरणाशंसा ४ रूपं शब्दश्चकामौ सौगंधयरसस्पर्शाभागास्ते मम प्रशस्ता भूयासुरिति कामभोगा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीनां विक्रयः केशवाणिज्यम् १० तिलेक्ष्वादीनां यन्त्रपीडनम् पीडनकर्म ११ वृषभादीनां वृषणकर्णादिच्छेदनं लाञ्छनकर्म १२ क्षेत्रादौ वन्हेर्ज्वालनम् दवदानं १३ गोधूम कर्कटयादीनां कर्षणार्थं सरो ह्रदादि शोषणं शोषणकर्म १४ असत्यो दुश्चरित्राः दास्यादयस्तासां पालनमसतीपोषणम् १५ इति।

अथ ज्ञानस्याष्टावतीचाराः। तद्यथा। अकालवेलायां निषिद्धदिने वा श्रुताध्ययनम् १ गुरोर्ज्ञानस्य ज्ञानोपकरणानां पुस्तकादीनां वा पादादि संघट्टनेनावमानो २ तथा एतेषामेव सम्मानादित्यागः ३ उपधान योगादिविना श्रुताध्ययनम् ४ यस्य मुखाच्छ्रुतमधीतं तस्य गुरोर्नाम उपलपनम् ५ देववन्दनप्रतिक्रमणादौ शुद्धाक्षराणामपठनम् ६ तत्रैव शुद्धार्थापठनम् ७ तत्रैवाशुद्धयोः सूत्रार्थयोः पठनम् ८ इति।

दर्शनस्याष्टौ अतीचारास्तथाहि । देवगुरुधर्मविषये शङ्काकरणम् १ सर्वाण्येव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दर्शनान्यशोभनानीति चिन्तनम् २ धर्मफले सन्देहः ३ मिथ्यादृष्टीनां महत्वं दृष्ट्वा तदुपरि तीव्ररागकरणम् ४ श्राद्धादीनां गुणश्लाघाकरणम् ५ नवप्रतिबुद्धश्राद्धादेः स्थिरताया अकरणम् ६ साधर्मिकाणां वात्सल्यस्याकरणम् ७ सतिसामर्थ्ये जिनशासनस्य प्रभावनाया अकरणम् ८ इति दर्शनस्याष्टावतीचाराः ।

अथ पञ्चानां समतीनामीर्यादीनां तिसृणाञ्च गुप्तीनां मनोगुप्त्यादीनां यथाविधि अपालने चारित्रस्याष्टावतीचाराः । तद्यथा । "अणसणमूणो परिया" इत्यादि द्वादशतपोभेदानां सम्यगकरणे तपसो द्वादशातीचारास्तथा हि । मनोवीर्य १ वचनवीर्य २ कायवीर्याणां देववन्दनप्रतिक्रमण स्वाध्याय दानशीलादौ अस्फोरणे वीर्यस्य त्रयोतीचाराः सम्यक्त्वस्य च पञ्चातीचारा स्तद्यथा । श्रीजिनेन्द्रोक्तपदार्थेषु सन्देहः शङ्का १ अन्यान्यदर्शनाभिलाषः कांक्षा २ धर्मफलं प्रति सन्देहो विचिकित्सा ३ अथवा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मलमलिन वपुषः साधून् दृष्ट्वा जुगुप्साकरणं विचिकित्सेति। मिथ्यादृष्टीनां प्रशंसा करणं कुलिंगीप्रशंसा ४ मिथ्यादृष्टिभिस्सह परिचयः कुलिंगी संस्तवः ५

अथ द्वादशव्रतानां षडतीचारा उच्यन्ते । तत्र प्रथमं स्थूलप्राणातिपातविरमणव्रते पञ्चातीचारा स्तद्यथा । निर्दयतया कशादिभिः पश्वादिताडनं वधः १ रज्वादिभिस्तान् गाढं बन्धनं बंधः। २ शस्त्रादिना तेषां कर्णवृषणादिच्छेदनम् छविच्छेदः, छविः शरीरं तस्य छेदः इति व्युत्पत्तेः ३ गोवृषभादीनां स्कन्धे सामर्थ्यातिरिक्तभारारोपणमतिभारः ४ चवर्णवेलासु वृषभादिभ्यो अन्नजलघासाद्यदानं भक्तपानव्यवच्छेदः ५

अथ द्वितीये स्थूलमृषावाद विरमणव्रते पञ्चातीचारास्तद्यथा । "त्वं चौरस्त्वं जार" इति परं प्रति अविचार्य भाषणं सहसाभ्याख्यानम् १ एकान्तेस्थितान् कानपि विलोक्य एते राजविरुद्धं चिन्तयन्तीति प्रकाशनम् रहोभ्याख्यानम् २ विश्वासिभिः स्वदारमित्रबन्धु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भिर्यत्प्रच्छन्नं कथितं तदन्येषामग्रे प्रकाशनं स्वदारमन्त्रभेदः ३ कष्टेन पतितस्य कस्यचित् पृच्छतो अलीकमीदृशं वदेरित्यादि शिक्षणं मृषोपदेशः ४ कूटलेखश्च प्रतीतः ५ इति ।

अथ स्थूल अदत्तादान विरमणव्रते पञ्चातीचारास्तद्यथा । चौराहृतवस्तुग्रहणं स्तेनाहृतम् १ चौराणां संबलादिदानेन साहाय्यकरणं स्तेनप्रयोगः २ घृतादौ तादृशवस्तुनो वसादेस्सम्मेलनम् तत्प्रतिरूपक्षेपः ३ विरोधि राज्ये द्रव्यलाभाय वस्तुविक्रयार्थगमनं विरुद्धगमनम् ४ लोकप्रसिद्धतुलामानयोर्न्यूनाधिककरणं कूटतुला कूटमानम् ५ इति ।

अथस्थूलमैथुन विरमणव्रते पञ्चातीचाराः यथा । वेश्यायां विधवायां कन्यायां वा गमन अपरिग्रहागमनम् १ भाटकदानेन स्तोककालं यावत् आत्मीयकृतायां गमनं इत्वरीगमनम् २ अंगं स्त्रीपुरुष चिन्हं तदन्यानि अनंगादीनि कुचोरुवदनादीनि तेषु रमणं अनंगक्रीडा ३ स्वापत्यानामिवान्यापत्यानां परिणायनम् परविवाहकरणं ४ कामभोगेषु





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गाढाभिलाषरतीव्रानुरागः ५ इति

अथ स्थूलपरिग्रह परिमाणव्रते पञ्चातीचारा यथा । गणिम (१) धरिम (२) मेय (३) परिच्छेद्ये (४) ति चतुर्विधस्य धनस्य शालिगोधूमादेस्समर्घेसत्योंकारा-दिनास्वीकृत्य नियमावधियावत्तत्रैव धानिनोगृहे व्यवस्थापनम् १ क्षेत्र वास्तुमध्यवर्ति-वृत्यादि दूरीकरणेन एकीकरणं २ पूर्णेवधौ गृहीष्यामीति बुद्ध्या स्वर्णरूप्यादेर्भार्यादिभ्यो-दानम् ३ कुप्यस्य स्थाल्यादेश्च दशकादितः पञ्चकादि करणम् ४ पूर्वं सामान्यतो नियमं विधाय पश्चात्सगर्भयोर्द्विपदचतुष्पदयोर्ग्रहणम् ५ इति ।

अथ षष्ठे दिक् परिमाणाख्य गुणव्रते पञ्चातीचारास्तद्यथा । ऊर्द्धाधस्तीर्यक् प्रतिक्रमणे वस्त्वानयनप्रेशणाभ्यां त्रयो अतिचाराः ३ अन्यादिक् योजनायान्यस्यां दिशि क्षेपणं क्षेत्रवृद्धिः ४ जानत एव स्वकृत दिक्प्रमाणविस्मरणं स्मृत्यन्तर्द्धानम् ५ इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सप्तमे भोगोपभोगव्रते ५ञ्चातीचारा यथा । सच्चित्तं भक्षेण कृतनियमस्य कृततत्परिमाणस्य वा पुंसः सच्चित्तं यद्दाडिमादिफलं तद्भक्षणम् १ पक्काम्रफलादि सच्चितप्रतिबद्धं तद्भक्षणम् २ अचालित कणक्कादि भक्षणम् ३ पृथुकादि दूष्यवस्तुभक्षणम् ४ अतृप्तिजनकाः लघुवीजा औषधयस्तुच्छोषधयस्तासां भक्षणम् ५ इति ।

अष्टमे अनर्थ दण्डाविरमणे पञ्चातीचाराः । यथा । कामोद्दीपकशास्त्राभ्यासः कान्दर्प्पः १ मुखाक्षिभ्रूविकारावेक्षणं कौटिल्यम् २ गाल्याद्यसंवद्धप्रलापित्वं मौखर्यं ३ संयुक्तस्य मुशल-घरट्टादेर्धारणं सयुंक्ताधिकरणम् ४ स्नानादिसमये अधिकतैलमृत्तिकादीनां सम्मेलनं सरोवरादिषु स्नानादिकरणेन पृथिव्यादीनां निरोधनं भोगोपभोगातिरेकः ५ इति ।

अथ नवमे सामायिकव्रते पञ्चातीचारा यथा । मनसि पापव्यापारचिन्तनं मनो दुःप्रणिधानं १ विकथाकरणं वागदुःप्रणिधानम् २ अप्रतिलेखिते स्थाने हस्ताक्षेपणं कायदुः-



For Private and Personal Use Only

प्रणिधानम् ३ सामायिकं कृत्वा मुहूर्तमात्रमपि तत्सेवनाया अकरणं अनवस्थानम् ४ सामायिकं मया कृतं न वेति स्मृतिविहीनता ५ इति ।

अथ दशमे देशावगासिकव्रते पञ्चातीचारा यथा । परंप्रतित्वया इदमानेतव्यमित्युक्त्वा अभिगृह विषयकदेशात्परतो वस्त्वानयनं आनयनप्रयोगः १ त्वयेदं मम वस्तु गृहादावानेतव्यमित्युक्त्वा स्वपार्श्वस्थाधिकवस्तुनोऽभिगृहीतदेशात् स्थानान्तरे मोचनं पुष्पप्रयोगः २ कंचित्कार्यमाकारयन्तं दृष्ट्वा स्वकार्यसाधनार्थं स्वयं शब्दकरणं शब्दानुपातः ३ तैथव परंप्रति स्वस्वरूपदर्शनं रूपानुप्रातः ४ अभिगृहीतदेशाद्बहिः कार्यज्ञापनाय पाषाणादिक्षेपणं पुद्गलक्षेपः ५ इति ।

अथ एकादशे पोषधव्रते पञ्चातीचाराः । यथा । अप्रतिलेखितशय्या संस्तारकसेवनम् १ अप्रतिमार्जितदुःप्रमार्जितशय्या संस्तारकसेवनम् २ अप्रतिलेखितासु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूमिकादिषु उच्चारप्रश्रवणपरिस्थापनम् ३ अप्रमार्जितासु भूमिकासु उच्चारादि परिस्थापनम् ४ प्रभातसमये अमुकमाहारं पाचयिष्यामीत्यादिप्रकारचिन्तनम् ५ इति ।

अथ द्वादशे अतिथिसंविभागव्रते पञ्चातीचारा यथा । साधुमागतं दृष्ट्वा दानबुद्ध्या देयद्रव्यस्य चित्तोपरिस्थापनम् १ सचितेन फलादिना देयवस्तुन आच्छादनम् २ स्वकीयमपि मोदकादि द्रव्यं परकीयमिति कथनम् ३ यदि एतेन निःस्वेनापि दानं दत्तं तत्किमहमतोपि हीन इति मात्सर्य्यात् दानं ४ आहारमानीय भुञ्जानानां भुक्तवतां वा साधूनां निमन्त्रणम् यथा मदीयोऽभिग्रहोपि न भज्यते वस्त्वप्येतेन गृहीतमित्यभिप्रायणेति ५ इत्थं द्वादशव्रतानां षष्ठिरतीचाराः सर्वेपि मिलिताः १२४ इति एषां मध्ये ये केप्यतीचाराः लग्ना भवेयुस्तेषां मिथ्यादुष्कृतमस्त्विति संघादिसमक्षं वाच्यम् । ततः सर्वेष्टार्थसिद्धिः ।

इति चातुर्मासिकत्रय व्याख्यानम् ॥ १ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ अष्टाहिकाव्याख्यानं लिख्यते । शान्तीशं शान्तिकर्तारं नत्वा स्मृत्वा च मानसे । अष्टाहिकाया व्याख्यानं लिख्यते गद्यबन्धतः ॥ १ ॥ इह च सकलदुष्कृतवारिणि विमलधर्मकारिणि इह परत्र च कृतप्रभूतशर्मणि श्रीपर्युषणादि पर्वणि समागते सति सकलसुरासुरेन्द्रः संभूय श्रीनन्दीश्वरनाम्नि अष्टमद्वीपे धर्ममाहिमानं कर्तुं गच्छति तत्र तावन्नन्दीश्वरद्वीपस्य मध्यभागे चतुर्दिक्षु चत्वारोऽञ्जनगिरयः सन्ति । अञ्जनवर्णाः पर्वता इत्यर्थः । तेषां प्रत्येकं चतुर्दिक्षु चतस्रो वाप्यः सन्ति, तासां वापीनां मध्यभागेषु दधिमुखाख्याः पर्वतास्सन्ति । दधिवर्णाः श्वेताः इत्यर्थः । पुनर्द्वयोर्द्वयोर्वाप्यो रन्तरेषु द्वौ द्वौ रतिकरपर्वतौ वर्त्तेते । रक्तवर्णावित्यर्थः । एवं चैकैकाञ्जनगिरेः समन्तात् चत्वारो दधिमुखा अष्टौ च रतिकरास्सन्ति । संमीलने द्वादश त्रयोदशश्च स्वयमञ्जनगिरिः इत्थं चतुर्दिक्षु चतुर्णामञ्जन गिरीणां सपरिकराणां मलिनेजाता द्विपञ्चाशद्गिरयः । ते च पृथङ्नाम संख्यया



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चत्वारोऽञ्जनगिरयः षोडश दधिमुखाः द्वात्रिंशद्रतिकर पर्वतास्तेषामुपरि पृथक्पृथक् एकैकं जिनभवनमस्ति। अतस्तत्र द्विपञ्चाशज्जिनभवनानि सन्ति तेषु च जिनचैत्येषु प्रत्येकं चतुर्विंशत्यधिकशतानि जिनबिम्बानि सन्ति। सर्वेषां मिलनेनाष्टचत्वारिंशदधिकचतुःषष्टिशतानि (६४४८) जिनबिम्बानि भवन्ति। तानि च सर्वाण्यपि चैत्यानि चतुर्द्वाराणि शाश्वतानि प्रवरतोरणाभिरलंकृतानि अतीवसुन्दराणि सन्ति। तत्र देवेन्द्राः बहुदेवदेवीपरिवृताः प्रवर्द्धमानभावेनाष्टाहिका महोत्सवं कुर्वन्ति। जलचन्दनपुष्पधूपाद्यष्टद्रव्यैर्जिनबिम्बं पूजयन्ति, जिनगुणान् गायन्ति, स्तुवन्ति, नाटकादींश्च विदधति। इत्थमष्टदिनावधिमहोत्सवं समाप्य पुनः स्वस्थानं गच्छन्ति। एवं श्रावकैरपि श्रीमत्तीर्थंकरप्रकाशितेस्मिन्पर्वणि समागतधर्मकर्माणि यत्नेन विधेयः। तथाचास्मिन्पर्वणि श्रावकाणां कृत्यमाह। "आश्व-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कषायरोधः कर्तव्यः श्रावकैः शुभाचारैः । सामायिकजिनपूजातपोविधानादि कृत्य परैः ॥१॥" तत्राश्रवाः पञ्च । तेचामी । प्राणातिपात १ मृषावाद २ अदत्तादान ३ मैथुन ४ परिग्रह स्तेषां रोधो निरोधः । अर्थात् त्यागः कर्तव्यः । एतावता प्रथमं द्वीन्द्रियादयोयेत्र सजीवास्तेषां विराधना श्रावकैर्वज्या । सर्वदानेष्वभयदानमेव श्रेष्ठम् यदुक्तं सूत्रकृदंगे "दाणाणिसिट्ठमभयं पयाणमिति" अन्यत्राप्युक्तञ्च । दीयते म्रियमाणस्य कोटिं जीवितमेव वा । धनकोटिं न गृह्णीयात्सर्वो जीवितुमिच्छति ॥१॥ अपि च । यो दद्यात् काञ्चनं मेरुं कृत्स्नामपि वसुन्धरां । एकस्य जीवनं दद्यान्नास्ति तुल्यं तयोः फलम् ॥२॥ अतोभयदानप्राधान्यख्यापनार्थं कथानकमुच्यते । तथा हि ।

वसन्तपुरे अरिन्दमनो नामराजासीत् तस्य पञ्चपत्न्यस्तासु चैकादुर्भगाश्चतस्रश्च राज्ञोत्यन्तवल्लभा आसन् । एकदा चतुर्वधूसमेतो राजा प्रासाद-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गवाक्षस्थो नानाविधक्रीडाविलासं कुर्वाणस्तिष्ठतिस्म । तस्मिन्नेवावसरे एकश्चौरो राज-
मार्गेण नीयमानो सपत्नीकेन तत्रस्थितवता राज्ञा दृष्टः । स च कीदृशश्चौरः कंठन्यस्तरक्त
करवीरमालो रक्तवस्त्रपरिधानो रक्तचन्दनानुलिप्तगात्रः पुरस्ताद्वादितडिंडिमादिवाद्यः
इत्येवंविधं विविधविडम्बनादिभिर्विडंब्यमानं तं चौरं दृष्ट्वा पत्नीभिः पृष्टं किमकार्यमनेना-
कारीति । तच्छ्रुत्वैकेन राजपुरुषेणोक्तं परद्रव्यापहरणमनेन कृतमिति । ततः संजात कृपयैकया
राजपत्न्या राजा प्रार्थितःयत् स्वामिन्! यो पुरा भवता मह्यं वरः प्रदत्तस्तदधुना सम्पाद्यताम् ।
येनाहमस्य चौरस्यैकदिनमुपकारं करोमि राजा तदाकर्ण्य तद्वचोऽङ्गीकृतवान् । ततस्तया
स चौरःमोचयित्वा दिनैकंयावद्विविधवस्त्रालंकारभोजनादिभिः सत्कृतः। ततो द्वितीयया
द्वितीयदिनं तथैव राजा संप्रार्थ्य रूप्यकलक्षव्ययेन सत्कृतस्तृतीयया तृतीयदिनं कोटि
रूप्यकैः चतुर्थ्या च बहुसत्कारादिभिः चतुर्थ दिनस्तस्य चौरस्यातिवाहितः एवं राज्ञाभि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्चौरस्यातिवाहितेषु दिनचतुष्टयेषु पञ्चमदिने सा दुर्भगा राज्ञी राज्ञः समीपमागत्यो वाच स्वामिन् ! मम दुर्भगाया उपरि भवदीया एतादृशी कृपा नास्ति तेन मया कदापि भवन्तो न याचिता अधुनास्य चौरस्य प्राणदानं मया याच्यते । राजा तद्दीनवचः श्रुत्वा कृपया तं चौरं तस्यै प्रादात् । अनया च तं चौरं स्वगृहे आनीय सामान्यभोज्येन भोजयित्वा कथितं मया तुभ्यं जीवनं प्रदत्तमतः पुनश्चौर्यं मा कार्षीः इदानीं स्वगृहं गच्छेत्युक्त्वा मुमोच । चौरोऽपि तां बहुमानयानः स्वगृहमगच्छत् अस्यैतादृशीं लीलां दृष्ट्वा सपत्नीभिस्सासूयं हसितं उक्तञ्च नास्य त्वया किञ्चित्सुखकारि कृतं इति तासां परस्परं बहूपकारविषये बिवादे जाते राज्ञा स एव चौर स्समाहूय पृष्टः । अहो आसु पञ्चसु कया तव बहूपकारः कृत इति ब्रूहि तच्छ्रुत्वा चौरेणोक्तं भो महाराज ! चतुरो दिनान्यावन्मया मरणभयभीतेन आभिः राज्ञीभिः प्रदत्तमपि स्नानपानादिकं नाज्ञायि अद्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पञ्चमेन्हि अस्याः पञ्चम्या राज्ञाः मुखादभयदानाकर्ण्य परमसुखमनुभूयते अत एतस्या उपकार एव सर्वतो महान् । इति तस्य वचः श्रुत्वा सर्वैस्सा प्रशंसिता । अतः सर्वदाने-ष्वभयदानमेव श्रेष्ठमिति ज्ञापितम् । इति दृष्टान्तः ।

अस्मिन्पर्वणि सुश्रावकेण खंडन पेषण वस्त्रक्षालनादि कृत्यस्त्याज्यः । तैलिकलो-हकारभ्राष्ट्रकमर्कादिषु वाचा धनव्यये न चारंभो निवारणीयः । स्वशक्त्या बंदिमो-क्षणश्चकार्यः । ग्राममध्ये चैतादृशी घोषणाकार्या यत् येन केनापि प्रकारेण जीवरक्षा कार्या ।-द्वितीयाश्रवपरित्यागे मृषावचनमत्र पर्वणि न वक्तव्यम् । गालिप्रदानादि कठोरवाणी अपि न भाष्या सर्वथा वाक्शुद्धिः कार्या । तृतीयाश्रवपरित्यागे परधनग्रहणं वर्जनीयम् द्रव्यस्य हि जन्तूनां प्राणरूपत्वात्तदपहरणे मरणरूपकष्टहेतुत्वात् । चतुर्थाश्रवपरित्यागेत्रपर्वणि ब्रह्मचर्य्यधारणम् । स्त्रीसङ्गमादिकं वर्ज्यमित्यर्थः । पञ्चमाश्रवपरित्यागे धनधान्यादिनवविधप-





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रिग्रहस्य प्रमाणंकार्यं। अर्थादपरिमिता तृष्णा न कार्येति भावः। अथ च पुनरस्मिन्पर्वाणि कषायरोधः कर्तव्यः कषायाश्चत्वारः ते च क्रोधमानमायालोभाख्यास्तेषां परित्यागो विधेयः तत्र हेतुः। क्रोधोदये कलहोत्पत्तिश्चिरन्तनप्रीतिनाशश्चेति। मानोदयेविनयनाशस्तथाचानेन ध्यानिनामपि मुनीनां केवलावाप्तावन्तरायः स्यात् राजर्षिबाहुबलवत्। एवं मायोदये लोभोदये चापि बहवो दोषा उत्पद्यन्ते। अतश्चत्वार एवमेकषायास्त्याज्या। उक्तञ्च "कोहो पीइ पणासेई माणो विणयनासणो। माया मित्ताणिनासेई लोहो सव्वविणासउ" (१) तस्मात् शुभाचारैः श्रावकैरत्र कषायरोधः कर्तव्य इत्युक्तं। अथ पुनरस्मिन्पर्वाणि यत्कर्तव्यं तदेव श्रावकविशेषणद्वाराह। कीदृशैः श्रावकैः सामायिकजिनपूजातपोविधानादिकृत्यपरैः, सामायिकञ्च जिनपूजा च तपश्च सामायिक जिनपूजातपांसि तेषां विधानं करणं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तदादीनि तत्प्रभृतीनि यानि कृत्यानि कार्याणि तेषु तत्परैरित्यर्थः । एतावता च पर्वणि सुश्रावकैः सामायिकंकार्यम् । तस्य स्वरूपं यथा । "समतासर्वभूतेषु संयमः शुभभावना । आर्त्तरौद्रपरित्यागस्तद्धिसामायिकं व्रतम् ।"—"दिवसेदिवसे लरकं देह सुवणस्स खंडियं रागो । रागो पुणसामाइय करेइ न पहुप्प एत्तस्स" २ आदिपदात्पौषधं कार्यं । पौषधफलं यथोक्तं "पोसहियसुहे भावे असुहाय खवेइ न त्थिसन्देहो । छिंदइनेरतिरियगइ पोसह विहि अप्प मत्तेणं" ॥ १ ॥ तत्करणसामर्थ्याभावे । अस्मिन्पर्वणि सुश्रावकैरजिनानां द्रव्यपूजा भावपूजा वा कर्तव्या । पूजाफलमिदं । "सयंप मज्जणे पुन्नं सहस्सञ्च विलेवणे । सहस्साहास्सियामाला अणन्तं गीयवाइये ॥ १ ॥" मनोवाक्कायशुद्धया च पर्वणि पूजास्नानादिकं विधेयं यदुक्तं । "एहवणच्चणेहिं यउमच्छ वच्छ पडिहार गेहिं । केवलियं पलियं कुस्सगोहिय जिणस्स भविज्झासिद्धत्तं" ॥ १ ॥ द्रव्यपूजासामग्र्याभावे भावपूजैव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्तव्या। साचेत्थं । श्रीजिनगृहं गत्वा शुद्धभावेन भगवद्दर्शनं कार्यम् । भगवन्मुद्रां विलोक्य तद्गुणगणस्मरणं विधेयम् । तत्फलं यथा । "दर्शनाद्दुरितध्वंसी वन्दनाद्वाञ्छितप्रदः । पूजनात्पूरकश्रीणां जिनः साक्षात् सुरद्रुमः" ॥ १ ॥ पुनः श्रीजिनदर्शनादेव बहूनां भव्यानां बोधिबीजावाप्तिर्भवत्यार्द्रकुमारवत् । तद्वृत्तान्तो यथा ।

अस्य भरतक्षेत्रस्य समुद्रतीरे अद्रको नाम यवनदेशोऽस्ति, तत्रार्द्रकनाम नगरं तस्यार्द्रकोनाम राजासीत् । तस्य राज्ञ आर्द्रक नाम्नी पट्टराज्ञी तयोरार्द्रकुमारो नाम पुत्रो बभूव । स च राजकुमारः क्रमेण संप्राप्तयौवनः स्वेच्छया मनोज्ञान् भोगान् भुञ्जानः सुखेन तिष्ठतिस्म । तस्य चार्द्रकराज्ञः श्रेणकनाम्नः कस्यचिद्राज्ञः सह परम्परागता परमा प्रीतिरासीत् एकदा श्रेणिकनृपः प्रचुरं प्राभृतं प्रगुणीकृत्य आर्द्रराजसमीपे स्वामात्यं प्रैषीत् । स चामात्योपि कियद्भिर्दिनैस्तत्र गतः । आद्रकनृपेण बहुमानपुरस्सरं सम्भाषितस्सत्कृतश्च ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तान्युपनीतानि प्राभृतानि राजाग्रे समर्प्य तदनुज्ञातः प्रत्याजगाम । आर्द्रकस्तंप्रत्यागतं दृष्ट्वा पप्रच्छ भो मंत्रिन ! मद्वंधोः श्रेणिकस्य कुशलं वर्तते तच्छ्रुत्वा तेन सर्वं तत्रत्यकुशल-वृत्तादिकं निवेदितं । तदाकर्ण्य राज्ञो मनसि परमानन्दो जातः । आर्द्रककुमारस्तस्मिन्नेवा-वसरे तत्रस्थित एतद्दृष्ट्वा पितरं पप्रच्छ भो तत ! कः सः श्रेणिको येन सह भवतामेतादृशी प्रीतिर्वर्तते । राजा प्रोवाच, पुत्र ! स श्रेणिको मगधदेशाधिपतिरस्ति तत्कुलेन सहास्माकं पारम्पर्यागता प्रीतिरस्ति । एतत्पितृवचः श्रुत्वा जाताल्हादेन कुमारेण मन्त्रिणः प्रत्युक्तं भो मंत्रिन् ! तस्य श्रेणिकस्य सर्वगुणोपेतः कश्चित्पुत्रोऽप्यस्ति किं? येन सहाहमपि मैत्रीं कुर्यासं । मन्त्रिणोक्तं भगवन् ! तस्याभयकुमारनामा सर्वकलानिधिर्बुद्धिसम्पन्नो महादानी नृपनीतिदक्षः कृतज्ञो सकलशास्त्रपारदृश्वा राजकुमारोस्ति, किं बहुना ते केपि जगति गुणा एव न सन्ति ये अभयकुमारे न निवसन्ति । एवं मन्त्रिमुखतो अभयकुमारगुणान्



For Private and Personal Use Only

श्रुत्वार्द्रकुमारः पितुराज्ञां समादाय तेन सहमैत्रींकर्तुं समिच्छत् । अथ कियता कालेना-न्यदासवार्द्रकः प्रवरमौक्तिकादीनि प्राभृतानि स्वमन्त्रिद्वारा तदन्तिके प्रेषयितुं विचारयामास । तद् ज्ञात्वा आर्द्रककुमारोऽप्यनेकानिविद्रुममौक्तिकादीन्यनुपमवस्तूनिसमादाय स्वाभिप्रायकथनपूर्वकं तानि वस्तूनि अभयकुमाराय तद्धस्ते प्रयच्छत् । मन्त्री च तानि सर्वाणि वस्तून्यादाय राजाज्ञप्तो मगधदेशं जगाम । गत्वा च कियाद्भिर्दिनै राजगृहमासाद्य तत्सर्वं श्रेणिकायन्यवेदयत् राजकुमारप्रेषितंप्राभृतं त्वभयकुमारप्रासादे गत्वा तदुक्तं सर्वं निवेद्य प्रयच्छत् । अथ जिनशासनकुशलोभयकुमारः श्रुत्वा तत्संदेशं मनसि एवमचिन्तयत् यदयं राजकुमारो विधर्मी तथापि सदाचारसम्पन्नो विचारवांश्च दृश्यते अथ चेदमपि प्रतिभाति यदयं विराधितश्रामण्यत्वादनार्येषु जातोऽस्ति परं स महात्मा-नियमादासन्नभव्यो दृश्यते । यतो अभव्यदूरभव्यानान्तु मया सह कदापिमैत्र्यभिलाषो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न भवेत् । अतः अनेन सह मैत्रीं विधायावश्यमेनं जिनधर्मानुयायिनं विधास्य इति । तत्र चायमुपायोस्ति प्राभृतछलेन तत्समीपेऽर्हत्प्रतिमां स्वर्णमयीं रत्नाभरणभूषितां प्रेषयिष्यामिचेत्तद्दर्शनाद्यदितस्य जातिस्मरणज्ञानोत्पत्तिर्भवेत्तर्हि सकलेष्टसिद्धिः । इति मनसि दृढं निश्चित्य छत्रचामरसिंहासनादिविराजितां रत्नमयीं मनोहरां प्रथमजिनेन्द्रप्रतिमां पेटिकामध्ये निधाय तत्पुरतो धूपदीपगंधमाल्यादीनि पूजोपकरणानि च संस्थाप्य द्वारं पिधाय राजमुद्रादिभिस्तां पेटिकां मुद्रयित्वा तमेव मन्त्रिणमाहूय पेटिकांदत्वोवाच मंत्रिन् पेटिकैषा राजकुमाराय दातव्या परन्त्वेवं वाच्यं यदेषा मंजूषा त्वया स्वयमेवैकान्तप्रदेशे स्थित्वोन्मुद्रया यथान्यः कोपि न पश्येदिति । अस्याचान्तर्गतवस्तु च स्वयमेव विलोकनीयम्, अन्यस्य कस्यचिन्न दर्शयितव्यम् मन्त्री तत्सर्वमाकर्ण्य तथेत्युक्त्वा सर्वाणि वस्तून्यादाय स्वदेशंजगाम । अथ कियद्भिर्दिवसैस्त-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रागत्य श्रेणिकप्रहितं प्राभृतं कुशलवृत्तकथनपूर्वकं राज्ञे प्रयच्छत् । ताञ्च मञ्जूषां राजकुमारसन्देशकथनपूर्वकां तस्मै आर्द्रककुमाराय प्रादात् ततस्तच्छ्रुत्वार्द्रककुमारस्तत्क-थनानुसारेणैकान्ते तां नीत्वा मंजूषामुद्घाटयामास। अथ तस्यां तमस्युद्योतकारिणीं रत्नमयीं राजकुमारप्रहितां तां ऋषभदेवप्रतिमां दृष्ट्वा स्वचेतस्यचिन्तयत् । अहो ! कि-मिदं किञ्चिदनुपमं देहाभरणमिदं प्रतिभाति तत्किं मूर्ध्नि आरोप्यं यद्वा कण्ठे हृद-यदेशे च धार्य्यम् । अन्यत्र वा कुत्रचिदारोप्यम् क्वापीदं तु दृष्टपूर्वमिव मां प्रतिभासते परं स्मृतिपथं नैवायाति कुत्र कदा दृष्टमिति । इत्थमत्यर्थं चिन्तयानस्य राजकुमारस्य जातिस्मरणजनिता मूर्च्छा समजनिष्ट, ततो मुहूर्तमात्रेणैवोत्पन्नजातिस्मरणः स कुमार-श्चेतनां प्राप्य स्वयमेव निजपूर्वभवकथां चिन्तयामास । तथा हि । इतो भवात् तृतीयभवे अहं वसन्तपुरनामनगराधिवासी सामठको नाम कुलम्बी अभूवं बन्धुमती



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाम्नी च मम भार्यासीत् । एकदा रहसि स्थितायास्तस्या मुखादहमर्हद्धर्मशृण्वं तेन श्रुतमात्रेणैव प्रतिबुद्धः संजातवैराग्योहं तस्याः सकाशादेव दीक्षां प्रगृह्य वनमगमम् । सा बन्धुमती अपि अन्याभिस्साध्वीभिस्सह प्रव्रज्य मदन्वेवागतवती । परं बहुकालं यावत् गुरुणा सह विहरमाणेन मया सा न विलोकिता । अथैकदा अकस्मादेव तस्योपरि मम दृष्टिः पतिता । अतस्तद्विलोकनादेव पूर्वानुरागं स्मरन् तस्यामनुरक्तो अभूवं तच्चाहमन्यस्मै साधवेऽकथयं । सचान्यस्मै मदीयामिमां वार्तां कथयामास स च तस्याः प्रतिवर्तिनी नाम सख्यै आचख्यौ सा प्रतिवर्तिनी तत्सर्वं बन्धुमत्यै अकथयत् । सा बन्धुमती च तदाकर्ण्य विषण्णवदना सती स्वसखीं प्रत्यूचे । अहो एष मत्पतिर्ज्ञातार्थोऽपि मर्यादामुल्लंघयति अतः का गतिः स्यात् । यदयमवश्यमेव मोहान्मां देशान्तरगतामपि न त्यक्ष्यति अतोऽावयोर्व्रतभङ्गस्यादतोहं निश्चितं मरणं प्रपत्स्ये



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतो मरगमन्तता न हि धर्मरक्षा इत्येवमुक्त्वा मरणे कृतनिश्चया सा साध्वी शुद्धभा-
वनयानशनं कृत्वा दुस्त्यजानपि प्राणांस्त्यक्त्वा देवत्वं प्राप्तवती । अथ कियद्भिर्दिवसैरहमपि
ईदृग्भावनया तां मृतां श्रुत्वाचिन्तयं । अहो सा महानुभावा तु व्रतभंगभयादेव मदर्थे
मृता अतोहमपि प्राणांस्त्यक्ष्ये यतो मम व्रतभंगो जात इति निश्चित्यानशनं विधाय
जीवनमत्यजं । किन्तु व्रतभङ्गप्रभावादद्यानार्यदेशे विधर्मिणां कुले चोत्पन्नोस्मि । सांप्रतं
यो मे प्रतिबोधकः स एव बन्धुस्स एव गुरुरस्ति भाग्यवशादीदृशः संगमः प्राप्तः, अतस्तं
द्रष्टुं बलवती समीहा वर्तते परं नृपाज्ञां विना तत्र गमनं न श्रेयस्करं अतः पितरमनुज्ञा-
प्याभयकुमारदेशं गमिष्यामि यत्र स मम गुरुरूपो बान्धवास्तिष्ठति । इति मनोरथं कुर्वन्
भक्त्या तामर्हतः प्रतिमामनुदिनं पूजयन् दिनान्यतिवाहयति स्म । एकदा कुमारो पितु-
स्समीपं गत्वा प्रणिपत्योवाच हे तात । स्वमित्रमभयकुमारं द्रष्टुं तत्र गमने अतीवोत्कंठास्ति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







तदनुज्ञातु भवान् तत्र गन्तुं मामिति । तच्छ्रुत्वा राजोवाच । हे पुत्र ! त्वया तत्र गमनेच्छा न कर्तव्या यतो राजानः स्वराजधानीं त्यक्त्वा न हि स्थानान्तरं गच्छन्ति अस्माकमपि श्रेणिकेन सहात्रस्थितानामेव मैत्र्यमस्ति इति पित्रा ह्यनुज्ञप्तो राजकुमारो विषण्णवदनस्सन् स्वगृहमेव तस्थौ परं शयने भोजने याने च तन्मनासि प्रतिक्षणं तदेव तद्दर्शनेहासीत् एवं कियद्भिर्दिवसैस्तन्मिलनचिन्तया जर्जरितशरीरं विषण्णवदन राजकुमारं विलोक्य आर्द्रक इत्थमचिन्तयत् । अहो ! यद्यप्ययं मया निरुद्धस्तथापि अस्य मनस्तु तत्रैव संलग्नमस्त्यतोयमवश्यं शीघ्रं तत्र प्रेषणीयः नचेत्कदाचिन्मामकथयैव गमिष्यति चेन्महान्कष्टो भविष्यति । अतस्तान्प्रेषणे यत्नो विधेय इति निश्चित्य बहून् सामन्तान् सेनया सहितान् तद्रक्षणाय नियुज्य पुत्रमाहूय मधुरवाग्भिः समाश्वास्य तंत्र गमनायाज्ञामदात् । राजकुमारश्चातीव प्रीतिमनाः पितरं नमस्कृत्य बहून्यनर्घाणि रत्नानि तां च जिनप्रतिमां

॥ २६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पेटिकादौ निधाय तां पेटीं स्वस्मिन्नेवाश्वे स्थापयित्वा पञ्चशतैस्सामन्तैः परिवृतस्स्वयमश्व-मारुह्य मगधदेशं प्रति जगाम । ते चाङ्गरक्षकाः राज्ञा समादिष्टाः सर्वतो भावेन तद्रक्षां चक्रुः । कदापि तत्पार्श्वं न त्यजन्ति स्म । अथैकस्मिन् दिने मार्गे गच्छन् राजकुमारः अश्वं वाहयन् पार्श्वरक्षकेभ्यः पुरुषेभ्यो किंचिदग्रे निःसृत्य गच्छतिस्म ततः कियति दूरवर्तिनि वनान्तरे अश्वं त्वरितगतिं विधाय झटित्यभयकुमारसमीपे गत्वा तं नमस्कृत्य तां प्रतिमां च दर्शयित्वा तेनाज्ञप्तस्तूर्णं वनान्तरमगमत् । अथातिक्रान्तेषु बहुषु देशेषु एकस्मिन् सघने वने सप्तक्षेत्र्यां गर्त्तं खनित्वा तत्सर्वं धनादिकं तस्मिन्निधाय स्वयं यतिलिङ्गं कृत्वा यावत् सामायि-कमुच्चारयितुमारेभे तावदाकाशस्थितया कयाचित् देवतया उच्चैरित्थं प्रोक्तं, "हे महाभाग ! यद्यपि त्वं महासत्वस्तथापि सांप्रतं दीक्षां मा धेहि यतो अद्यापि ते भोगफलरूपं कर्म शेषमस्ति अतस्तदुक्त्वा कालान्तरे व्रतं गृण्हीयाः यतो भोग्यं कर्म तीर्थंकृतामप्यवश्यं भोक्तव्यम् । तस्मात् हे महात्मन् ! अनेन दीक्षाग्रहणरूपाग्रहेणालं यतो गृहीतमपि दीक्षा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्रतं दैववशात्त्वं त्यक्ष्यते तर्हि तेन भोजनेन किं? यद्युक्तमपि वम्यते।" इत्थं बहुधा तया देववाण्या निषेधितोऽप्यार्द्रकुमारः स्वपौरुषमंगीकृत्य देवीवाचमनादृत्य स्वयं दीक्षामाददे। अथ च स मुनिवेषधृक् राजकुमारस्तीक्ष्णं व्रतं पालयन् भूमण्डले पर्यटत्। अथैकदा वसन्तपुरनाम्नि नगरे समागत्य तत्रैव कस्मिंश्चिद्देवमन्दिरसमीपे कायोत्सर्गार्थं तस्थौ। अस्मिन्नेव नगरे देवदत्तो नाम कश्चित् श्रेष्ठी आसीत् तस्य च धनवती नामातीव सुन्दरी भार्या अनयोर्दम्पत्योरेका श्रीमती नाम काचिद्रूपलावण्ययुक्ता कुमारिका बभूव। या प्राग्भवे अस्य राजकुमारस्य बंधुमती नाम भार्यासीत् सैव देवलोकात्पुनः मर्त्यलोकमुपागत्य श्रीमतीरूपेण अस्य श्रेष्ठिनः गृहे समुत्पन्ना। अथ सा कुमारिका धात्रीभिर्लाल्यमाना क्रमेण संजातयौवना सखीभिः परिवृता तस्मिन्नेव देवमन्दिरसमीपे क्रीडार्थमागत्य विहरतिस्म, एवं क्रीडांकुर्वत्यस्तास्सर्वा एव कन्याः दर्शनार्थमाया-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तान् पुरुषान् विलोक्य जातहृच्छयाः परस्परं प्रोचुः यदद्य सर्वा एव यथेच्छं वरान् वृणुत इति मनसि परस्परं दृढीकृत्य ताभिर्यथारुचिवरा वृताः श्रीमत्याचोक्तं "हे सख्यः! मया तु अयं साधुर्वृतः यत्तपसि तिष्ठति." इत्युच्चारणसमकालमेव अतीव गर्ज्जनपुरस्सर-स्तनयित्नुः रत्नान्यवर्षत्। एतदाश्चर्यं विलोक्य गर्ज्जनाद्भीता सा श्रीमती तस्य मुनेः समीपमागत्य पादयोरुपरि झटित्यलगत्। मुनिस्त्वेतदाश्चर्यं दृष्ट्वा जातक्षोभ इत्थमाचिन्त-यत् अहो अत्र तस्थुषोऽपि ममायमुपसर्गोऽभूत् यदसौ कुमारिका समायाता अतश्चात्र न स्थेयमिति विचिन्त्य तां पादयोः संलग्नां कुमारिकां निर्भर्त्स्यान्यत्रागमत्। अथ तद्दे-शीयो राजा तत्र रत्नवृष्टिं श्रुत्वा तानि रत्नान्यादातुं तत्रागत्य राजपुरुषैस्तद्धनं यावदेक-त्रयितु मारेभे तावदाकशवाणी अभवत् "राजन्! एतद्द्रव्यं तु अस्यै कन्यायै मया प्रदत्तं अतश्चैनं मा गृहाण"—राजा इति वचः श्रुत्वा तत्सर्वं धनं कन्यापित्रे समर्प्य प्रतिगतः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कालान्तरे देवदत्तश्रेष्ठी स्वकन्यकाविवाहार्थं योग्यं वरमाचिन्तयत् कन्यका च तदाकर्ण्य पितुः समीपमागत्य प्रोवाच “ भो तात ! मया तु देवमन्दिरसमीपे तपः कुर्वाणो यो महर्षिस्तस्मिन् दिने वृतः स एव मम वरः नान्यस्य कस्यचिदपि तमृते पाणिग्रहणं विधास्ये यतस्त्वयापि तद्वृष्टिधनग्रहणसमयेऽनुमोदित अतो मामन्यस्मै दातुं नार्हसि उक्तं च । “ सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति साधवः । सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत् सकृत् । ” इति कन्यावचः समाकर्ण्य श्रेष्ठी तामूचे, हे पुत्रिके ! तत्तु मयापि स्मृतं परं स तु स्वच्छन्दगतिविरक्तो यति रस्ति अतो नैकत्रावतिष्ठते अतस्तस्य प्राप्तिस्तु दुष्करा, न जाने इतः कुत्र गतः पुनरायास्यति न वा आयास्यति चेदपि कथं ज्ञास्यति तस्य मनोऽप्सितं, यत्तस्य गृहस्थेच्छा वर्त्तते आहोस्विन्नेति । श्रीमत्योक्तं ।--हे तात ! मया तद्दिनगर्जितभीतया तच्चरणे लग्नया अभिज्ञानं दृष्टं तस्मादतः परमेवं विधातव्यम् यत



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्यहं तव गृहे समायातान् साधून् स्वयमहं विलोक्य स्वहस्तेन भिक्षादिकं दद्यासं। येन सर्वेषां समागतानां साधूनां दर्शनमनायासेनैव भविष्यति तेषु च सोपि कदाचिदवश्यमेव समायास्यति। श्रेष्ठी तदाकर्ण्य तयोक्तं सर्वं चक्रे। अथ सा कुमारिका पित्राज्ञया प्रत्यहं द्वारि स्थित्वा साधुभ्यो भिक्षां ददाति स्म। अथैकदा व्यतीते द्वादशवर्षमिते महति काले स एव महामुनिर्यथेच्छं पर्यटन् दिग्भ्रान्त्या तत्रैवागतः तल्लक्षणैश्चतया चोपलक्षितश्च, श्रीमतिस्तु झटित्युत्थाय तच्चरणावभिवन्द्य बद्धाञ्जलिः सन् इदमूचे हे नाथ! इदानीं महद्भाग्यादेव भवद्दर्शनमुपलब्धं तस्मिन् दिने तत्र देवमन्दिरसमीपे यो मया वृतः स त्वमेवासि अतो महता कालेन दर्शनोत्सुकां मां मुग्धां त्यक्त्वा कुत्र यासि? यद्दिनतस्त्वमन्तर्हितस्तद्दिनमारभ्य मया महता दुःखेन कालो गम्यते अतो मां मा परित्यजतु भवान् यदि चेदिदानीमपि मां विहाय यास्यसि चेदहमिमं देहं विमुच्य तुभ्यं स्त्रीहत्या-

For Private and Personal Use Only

रूपपातकं दास्ये एवं विवदमानयोस्तयोस्तस्याः पित्रादयः समागत्य तेऽपि तस्य मुने-रभ्यर्थनां चक्रुः। स साधुश्च एतेषां महानाग्रहं विलोक्य व्रतारंभकानिषेधकां तामाकाश-वाणीं स्मृत्वा तद्भोग्यकर्मोदयादृणमोक्षमिव कर्तुं तां श्रीमतीं पर्यणैषीत्। अथ कियता कालेन श्रीमत्या सह नानाभोगान् भुंजानस्य तस्य क्रमेण पुत्रः संजातः स च शैशवे वर्द्धमानो ऋषिकुमारः बालशुक इव वक्तुमुल्लसज्जिव्हो बभूव। एव मतिक्रान्ते कियति काले स आर्द्रककुमारः गृहस्थफलभूतं पुत्रं विलोक्य हर्षितस्सन् श्रीमतीं प्रोवाच "हे भद्रे! अतः परं ते पुत्रः सहायोस्तु अहं प्रव्रज्यामि" इति भर्तृवचः श्रुत्वा विषण्णवदना श्रीमती सुतं प्रत्यवसरं ज्ञापयितुं तूलपूणिका सहितं तर्कुमादाय समुपाविशत्, एतस्मिन्नेवा-वसरे ऋषिकुमारबालोचितां क्रीडां कुर्वन् गृहे समागत्य स्वकीयां मातरं तूलकर्तनक्रियां कुर्वाणां विलोक्य जातविस्मयः पप्रच्छ " हे अम्ब ! एतद्दीनजनोचितं कर्म किं प्रारब्धं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा तच्छ्रुत्वा प्रोचे ! "हे पुत्र तवपिता त्वां मां च त्यक्त्वा प्रव्रज्यार्थं गन्तुमना वर्तते अतः गते च तस्मिन् पतिहीनाया मे एतत्तर्कुरेव शरणं" इति श्रुत्वा स बालको मन्मनाक्षरै-रुवाच हे अंब ! मा खेदमावह स कुत्र गमिष्यति अहं तं बध्वा रोत्स्ये कथं यास्यतीत्युक्त्वा तर्कुसूत्रमादाय झटिति पितुः समीपमागत्य सूत्रेण तत्पादावेष्टयत् मुखेन च मातरमेवं जगाद मातः मा भैषीः असौ मया तथा बद्धोस्ति यथा कथमपि न यास्याति । आर्द्रकुमार-स्तस्य बालस्यैतादृशं चाञ्चल्यं दृष्ट्वा मधुरां वाचं चाकर्ण्य जातस्नेहः पुलकिताङ्गो गद्गद-वाण्या तमुवाच हे पुत्र! यावद्भिस्तन्तुभिस्त्वया मे पादौ बद्धौ तावन्त्येव वर्षाणि पुनर्गृहे स्तिष्ठामि अतस्तन्तून् गणयित्वा बंधनानि मोचय, ततो गणिता द्वादशबंधा अभवन् तेन स द्वादशवर्षाणि पुनर्गार्हस्थ्यमत्यवाहयत् । अथातिक्रान्ते प्रतिज्ञाकाले स वैराग्यपूर्णमानसो आर्द्रकुमारः रात्रेः पश्चिमे प्रहरे एवमचिन्तयत् अहो मया प्राग्भवे मनसैव व्रतं भग्नं तेनाह-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मनार्यत्वं प्राप्तोस्मि अस्मिञ्जन्मनि पुनर्व्रतं गृहीत्वा मुक्तवतो मे का गतिर्भविष्यति। अत इदानीमपि प्रव्रज्यां गृहीत्वा तपसात्मानं शोधनमेव श्रेयान् इति मनसि निश्चित्य प्रातःकाले श्रीमतीं स्वपत्नीं पुत्रं च संभाष्य तयोरनुमतिं गृहीत्वा साधुलिंगं समादाय निर्भयस्सन् गृहान्निर्ययौ । अथ कियता कालेन पृथिव्यां पर्यटन् राजगृहनाम्नि नगरस्यां तराले चौर्यवृत्त्यां कुर्वाणान् तानेव पञ्चशतमितान् स्वसामन्तान् ददर्श तैश्चाप्युपलक्षितो भक्त्या वन्दितश्च साधुवेषधारी आर्द्रकुमारः प्रोवाच "भो भोः! युस्माभि पापहेतुकी एषा पामरजीविका किमादृता" तैरुक्तं " हे प्रभो! अस्मान् वञ्चयित्वा यदा त्वं पलायितस्तदा लज्जया नृपसमीपमगत्वैव तवान्वेषणे लग्नाः सन्तौ पृथिव्यां भ्रमन्तःस्वोदरपूर्तिविधायितीं कामपि जीविकामलभमाना अनया चौर्यवृत्त्यैव जीवामः। मुनिस्तच्छ्रुत्वोवाच भवद्भिर्न साधु कृतं यत् केनापि पुण्ययोगेन दुर्लभमिमं मानुषदेहं प्राप्य जीवहननप्रधानेयं नीच-

वृत्तिरंगीकृता । अनेन मनुष्यदेहेन तु स्वर्गापवर्गप्रदो धर्म एव सेव्यः हिंसाचौर्यादीनां
तु सर्वथा त्याग एव विधेयः । यूयं स्वामिभक्ताः प्राणदहं च भवतां स्वामी अतो ॥ ३७ ॥
इमं पापकर्म परित्यज्य मम मार्ग एवानुसरणीयः ।” ततस्ते प्रोचुः ‘भगवन् पूर्वं तु
भवान् नः स्वामिरेवाभूत् इदानीन्तु ज्ञानदो गुरुरसि यतस्त्वया धर्मो ज्ञापितः अतोऽस्मान्
दीक्षयानुग्रहाण इति श्रुत्वा स आर्द्रकुमारस्तान् प्रव्राज्य तैस्सहितः श्रीमहावीरं वन्दितुं प्रभोः
गृहाभिमुखं ययौ । अथ मार्गे गच्छतस्तस्य कश्चिद्गोशालोऽभिमुखो मिलितस्तेन सह
तस्य विवादश्च प्रवृत्तः तद्विवादं द्रष्टुं तापसाः सहस्रशः मुनयः श्रमणाश्च तत्रागतास्त-
॥ ६३ ॥ स्थौ । अथ गोशालोऽवदत् “भवता तपः कष्टं वृथैव, यतः शुभाशुभफलानां कारणं
नियतिमेव मन्यन्ते महात्मानः” । ततो मुनिरवदीत् ‘लोके नापि तत्र कारणं भवति यदि
अद्दा० सर्वत्र नियतिरेव कारणं चेत्तर्हि अभीष्टसिद्ध्यर्थं सर्वाः क्रिया वृथा प्रसज्येरन् । तथा हि हे ९३॥०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नियतिवादिन्! सर्वथा स्वस्थाने एव किं न तिष्ठसि? भोजनाद्यवसरे भोजनार्थं किमित्युद्यमं करोषि एवं स्वार्थसिद्धये नियतिवत् पौरुषमपि प्रधानं जानीहि। अर्थसिद्धौ नियतेरपि पौरुषमाधिक्यं भजते। तथा हि आकाशात्पानीयं पतति परं गर्जनादिकमपि तस्माद्भवति अतः नियतिर्बलीयसी परं नियतेरपि पौरुषं बलीयान् इत्यादि युक्तिभिस्तं गोशालं स मुनिर्निरुत्तरं चक्रे। तदा 'जयजय' शब्दं कुर्वद्भिः खेचरादिभिस्तस्य महा-मुनेर्बह्वी प्रशंसा कृता ततः स आर्द्रकऋषिः हस्तितापसाश्रम समीपे आययौ तत्रस्थास्तापसा एकं महान्तं हस्तिनं हत्वा तन्मांसं भुंजानाः बहून् दिवसानतिवाहयन्ति अत एव तदाश्रमस्थानां 'हस्तितापसा' इत्याख्या बभूव। एष आर्द्रकुमारोपि एतेषां हिंसाप्रधानलीलां विलोक्य मनसि घृणामकरोत्। ते चैतद्विज्ञाय एनमूचुः "भो साधो! एकस्यैव हस्तिनो हननं वरं यतः एकजीवघातेनास्माभिर्भूयान् कालोऽतिगम्यते मृगतित्तिरमत्स्याद्यैर्बहुभिरपि यथा न। तस्माद्बहूनां जीवानां



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भक्षणाद्धि लोकजीवस्यैव भक्षणं श्रेयान् बहुपापाभावात् " इत्युक्त्वा ते मिथ्याधर्मनिष्ठास्तपस्विनो एकं तत्र विचरन्तं महागजंमारणार्थं बबंधुर्यत्र च शृंखलाबद्धस्स गज आस्ते तेनैव मार्गेण आर्द्रकुमारोपि गच्छति स्म । अथ स हस्ती पंचशतशिष्ययुतं तमार्द्रकुमारं मुनिं गच्छन्तं विलोक्य प्राणपरीप्सया यदा तच्छरणगमनायैच्छत् तत्काल एव तस्य शृंखलादयोबंधनाः स्वयमेव व्यशीर्यन् हस्ती च तच्चरणवन्दनार्थं झटिति प्राद्रवत् । ते तापसा अकस्मादेव तं हस्तिनं तस्य मुनेः समीपं धावमानं विलोक्य " हा ! एष मुनिर्हतो हतः, " इति ब्रुवाणास्तमन्वधावन् किन्तु स गजस्तत्समीपमागत्य नम्रीकृतकुम्भाभ्यां तत्पादावभिवन्दयत् पुनश्च स्वां शुण्डां प्रसार्य पुनः पुनस्तच्चरणौ स्पृशति स्म । आर्द्रकुमारस्तं शरणागतं विलोक्य कृपादृष्ट्या निस्सरणसंकेतं कृतवान् हस्ती च तद्विज्ञाय तूर्णं वनान्तरे प्राद्रवत् । ते तापसा अस्य मुनेरेतादृशं प्रभावं विलो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्य जातविस्मयाः सन्तस्तं प्रणम्य तन्मुखाद्धर्मादिकं श्रुत्वा दीक्षां च प्रगृह्य श्रीमहावीर-शरणं ययुः । अथ तद्देशीयो श्रेणिकनृपः अस्य मुनेर्हस्तिमोक्षणादिकं श्रुत्वा अभयकुमार-युक्तस्तद्दर्शनार्थमाययौ । मुनिश्च भक्त्या कृतप्रणामं धर्मश्रवणेच्छुकं राजानं विलोक्य कुशलप्रश्नपूर्वकमाशीर्दत्वा तत्रागमनकारणमपृच्छत् । राजा तच्छ्रुत्वोवाच "भगवन्! हस्ति-मोक्षणान्मम महदाश्चर्यं समजनि अतो भवद्विधानां दर्शनार्थमेव समायातोऽस्मि." । मुनि-स्तदाकर्ण्य प्रोवाच । "राजन्! गज मोक्षणं तु न दुष्करं किन्तु सांसारिकामतन्तुपाशमोक्षणमेव मां दुष्करं प्रतिभासते" । राज्ञा पृष्टं "स्वामिन! तत्कथं?" तदा मुनिस्सकलामेव स्वां कथां तदग्रेऽकथयत् । अभयकुमारं च प्रत्यभाषत् "हे मित्र! त्वं मम निष्कारणोपकारी बान्धवोऽभूत यत्त्वत्प्रेषितार्हत्प्रतिमादर्शनादहं जातिस्मरणं प्राप्य निजधर्मानुरक्तोऽभूवं । इदं विविध-मुपायं विना मां जिनधर्मप्राप्तिरसम्भवा एवासीत । अतो महापङ्के निमग्नोऽहं त्वयो-द्धत-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्वत्प्रसादादेव चारित्रावाप्तिर्जाता इत्युक्त्वा विरराम । श्रेणिकाभयकुमाराद्यारेतादृशीं विवेकिनीं बुद्धिमस्य विलोक्य पुनः पुनः प्रणम्यानुज्ञां गृहीत्वा स्वस्थानं ययुः अथ स मुनिराजगृहपुराभ्यर्णे समवसृतं श्रीवीरस्वामिनमभिवंद्य तच्चरणकमलसेवया स्वकीयं जन्म सार्थीकृत्वा क्रमेणायुःक्षये श्रीजिनपदं प्राप । इति श्रीजिनदर्शनमाहात्म आर्द्रकुमारदृष्टान्तः ।

अथास्मिन् पर्वणि यत्कर्तव्यं तदेवाह । तपोविधानादीनि । यथाशक्ति तपांसि यत्नो विधेयः अर्थात् चतुर्थषष्ठाष्टमादि रूपं तपः कार्यमित्यर्थः तत्र यदि कश्चित् स्नेहवशात्तन्निषेधमपि कुर्यात् तथापि तल्लोपबुद्धिर्न धार्या श्रीभरतपुत्रसूर्ययशोनृपवत् । तत्कथा चेत्थम् ।

अयोध्यानगर्यां सूर्ययशो नाम राजाऽऽसीत् स च नीतिवित् अखंडशासनो त्रिखंडभूमिस्वामी अतुलितप्रतापवान स्वबलेन सर्वानेव दुष्टान् वैरिणः स्ववशं नीतवान् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इंद्रेणोपढौकितं राजमुकटं च शिरसि धृतवान्, तन्मुकटप्रभावेण स नृपः सुरासुरसेव्यो बभूव। तस्य च राधावेधपणात्प्राप्ता कनकविद्याधरपुत्री जयश्रीर्नाम पट्टराज्ञी आसीत् अन्याश्च बह्व्यो पत्न्यश्चासन्। स राजा चतुःपर्वी विशेषेणाष्टमीं चतुर्दशीं च प्रत्याख्यान-पोषधादितपसा आराधयति स्म। अथैकदासौ धर्मेन्द्रः सुधर्मां सभामाश्रितो ज्ञानात्तन्निश्चयं ज्ञात्वा चमत्कृतिं प्राप। तदोर्वशी देवी विश्ववशीकरणसामर्थ्यं बिभ्राणा अकस्मादेव देवसभायां सुखासीनस्य सुरेन्द्रस्य शिरःकम्पं दृष्ट्वा चकितमनासती प्रोवाच स्वामिन्! सांप्रत-मकारणमेव कुतः श्रीमतां शिरःकंपः? किंनिमित्तमिदानीं तुष्टेन भवता शिरः कम्पितः अस्य कारणं श्रोतुं बलवती मम समीहास्ति।' इन्द्रोवाच। "मयाधुनाज्ञानदृष्ट्या भरतक्षेत्रे ऋषभस्वामिनः पौत्रो चक्रवर्तिनो भरतस्य च पुत्रो अयोध्याधिपः सूर्ययशोनाम राजा सात्वि-कानां शिरोमणिर्दृष्टः। स चाष्टमीचतुर्दशीपर्वणस्तपः-प्रभावादिदानीं सुरासुरैरप्यप्रधर्षोऽस्ति।



For Private and Personal Use Only

तस्य तपसि दृढनिष्ठां विलोक्य महीयान्ममाश्चर्योजातः । यदि सूर्यः पूर्वदिशमतिक्रम्य पश्चिमायामभ्युदयेत् तथा च मेरुर्वातैः कम्पेत् समुद्रो मर्यादां त्यजेत् कल्पवृक्षो वा निष्फलो भवेत् तथापि एषः कण्ठगतैः प्राणैरपि जिनाज्ञावत् स्वकृतं निश्चयं न त्यजति '—उर्वशी इत्थमिन्द्रवचः श्रुत्वा किंचिन्मनासि विचार्य प्रत्युत्तरमुवाच ' हे स्वामिन! युक्तज्ञस्त्वं भूत्वा मनुष्याणां निश्चयं किं श्लाघसे ? यः सप्तधातुनिष्पन्नशरीरो अन्नजीवकः स देवैरप्यचाल्यः इति कः श्रद्धेत् मद्गानरसपूरेण केषां विवेकप्रमुखा गुणा न विलयं यान्ति ? तत्र गत्वा तमवश्यं सद्यो व्रताद्भ्रंशयिष्ये इति प्रतिज्ञां विधाय रंभया सहिता उर्वशी हस्तेन वीणां दधाना स्वर्गाद्भूमिमवतरति स्म । आगत्य च अयोध्यानिकटवर्तिन्युद्याने श्रीऋषभदेवस्वामिनो मंदिरे मोहोत्पादकं रूपं कृत्वा गायति स्म । तद्गानमोहिताः पक्षिमृगसर्पाद्या अपि आलेख्यलिखिता इव पाषा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णघटिता इव निश्चलनेत्रा बभूवुः । अस्मिन्नेवावसरे सूर्ययशो नृपः चतुरंगिण्या सेनया परिवृत्तो मार्गे गच्छन् तदद्भुतं गानं श्रुत्वा विस्मयाविष्टः सन् तत्रैव क्षणमात्रं तस्थौ । यतो सेनायाः वाजिगजादयोऽपि तद्गानश्रवणात् पदमात्रमपि प्रसर्पितुमसमर्था इव बभूवुः । स नृपोऽपि एवं विषमदृष्टपूर्वमाश्चर्यं विलोक्यामात्यंप्रति सादरमुवाच, भो मंत्रिन् ! संसारे गानतुल्यः किमपि श्रवणसुखदं वस्तु न विद्यते यच्छ्रवणादिमे पशवोपि ईदृग्विमोहिताश्चित्रलिखिता इव तिष्ठन्ति, गानेन देवदानवनृपका-मिन्यादयोऽपि वशीभवन्ति किमुतान्याः मानुष्यः,? अतो वयमपि अस्मिनृषभदेवचैत्ये देवं नमस्कर्तुं यामस्तत्र च गत्वास्याः सुन्दर्याः गानं शृणम इति मन्त्रिणमामंत्र्य तद्गानमूर्च्छनादिमोहितो महीपालः मन्त्रिणा सह तस्मिन् जिनचैत्यान्तरे जगाम । अथ च तत्र हस्तयोर्वीणां बिभ्रत्यौ गीतध्वनिं कुर्वत्यौ कामभार्ये इव रूपलावण्ययुक्ते कुमारि-





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

के विलोक्य तद्भ्रूकटिभंगाविमुक्तैर्कामबाणैर्विद्धहृदयो नृपरित्थमचिन्तयत् । अहो एतयोरिद्‌-मद्भुतं रूपं कस्य भाग्यवतः भोगाय भविष्यति । इति मनसि मुहुर्मुहुर्ध्यायन् जात हृच्छयः देवं प्रणम्य चैत्याद्बहिः समागत्य एतयोः कुमारिकयोः कुलादिकं ज्ञातुं मन्त्रिणं प्रेषयामास । सोपि राजाज्ञप्तस्तत्र पुनः गत्वा सुधामधुरया वाचा इदमपृच्छत्, हे कन्यके ! युवां के ? युवयोः पतिश्च कः ? किमर्थमिहागमनं कृतमिति सर्वं वदतात्–इति तद्वचःश्रुत्वा तयोरेका उवाच, भो राजमन्त्रिन् ! आवां मणिचूडनाम्नो विद्याधरस्य पुत्र्यौ स्वः । आबा-ल्यादेवं गानवादनकलास्वेवादरवत्यौ अभूव किन्तु क्रमेण प्राप्तयौवने वीक्ष्यास्मत्पिता वरान्वेषणार्थमनेकविधं प्रयत्नं करोति परं न ह्यद्यापि सदृशस्य वरस्य लाभःसम्प्राप्तः । अत एव स्वसदृशं पतिमलभमाने अर्हच्चैत्यानां दर्शनवन्दनादिभिः स्वं जन्म सफलीकर्तुमिच्छन्त्यौ अस्मिन् अयोध्यावर्तिनि ऋषभदेवचैत्ये मनेप्सितलाभाय भगवतो देवस्य सेवाकरणसमी-

For Private and Personal Use Only

हयात्रागमनमिति । एवमाकर्ण्य राजमन्त्रीपुलकाङ्कितः प्रत्युवाच हे भद्रे! युवयोरनेन सूर्ययशसा नृपेण सह सङ्गमो युक्तः यतोऽयं ऋषभस्वामिनः पौत्रो चक्रवर्तिनो भरतस्य पुत्रो सर्वकलानिधिर्गुणगणमाण्डितः श्रीमान रूपयौवनसम्पन्नो मूर्तिमान् काम इवास्ति। ऋषभदेवो निश्चयं युवयोरुपरि तुष्टः यतो अनायासेनैवेदृशो वरः सम्प्राप्तः। ते इत्थं मन्त्रिवचः श्रुत्वा प्रत्यूचतुः। आवां हि स्वाधीनंवरं विहाय अन्यं पतिं नैवाश्रयावहे यतः स एव आवां पतिर्भवितुमर्हति य आवयोर्वाचमन्यथा न कुर्यात्, इत्येव नः पणमस्ति। यदि भवद्राजा स्वीकुर्याचेद्गृण्हातु पाणिमावयोः। मन्त्री इत्थं प्रतिज्ञामाकर्ण्य राज्ञः समीप मागत्याकथयत्। राजा तु ओमित्युक्त्वा स्वीचक्रे मन्त्री नृपाज्ञया तयोः समीपमागत्य नृप-प्रतिज्ञां निवेद्योवाच, भवत्वावयोर्नृपेण पाणिग्रहणं यतः सर्वमिदमङ्गिकरोति भूपालः पुन-रहमपि आवयोर्विश्वासार्थं ब्रवीमि यद्यावयोर्वचः न विधास्यति चेन्मया स निषेध्यो भवे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिति । तेपि श्रुत्वैतन्मंत्रिवचः राजानमाहूय ऋषभदेवसमक्षं विधिना राज्ञः पाणिग्रहणमकुर्वतां। अथ तयोः प्रीतिरसाकृष्टो भूपतिः संसारे तद्भोगमेव सारं मन्यमानः अहर्निशं ताभ्यां सह विविधान् भोगान् भुञ्जानो विस्मृतान्यकृत्यः सुखेन कालं निनाय। एकदा संध्यासमये ताभ्यां संयुतो गवाक्षमारूढः अष्टमीपर्वविज्ञाय पटहादिना तदुत्सवाय नगरे घोषणामित्थमकारयत् "भो लोकाः ! श्वो अष्टमीपर्वं भविष्यत्यतस्तदाराधने संलग्नचित्तास्सर्व एव भवन्तु"–अथ तेपि डिंडिमादिना कुर्वाणां राजाज्ञां विलोक्यावसरं ज्ञात्वा तयोर्ज्यायसी रंभा अजानतीव नृपतिं प्रति अस्या घोषणायाः कारणमपृच्छत् । नृपेणोक्तं, प्रिये ! अस्माकं तातेनोक्तं चतुर्दश्यष्टमीरूपं पर्वमस्ति तथा चामावस्यापौर्णमासी अष्टाहिकाद्वयं चतुर्मासीत्रयं पर्युषणाख्यं वार्षिकं च पर्व एतानि अन्यानि च बहूनि पर्वाण्युक्तानि तान्युपोष्यानि । ज्ञानाराधनार्थं च पंचमी प्रोक्ता एतेषु पर्वदिनेषु विहितं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुण्यं स्वर्गमोक्षसुखप्रदं भवति, तस्माच्चतुःपर्व्यामखिलं गृहव्यापारादिकं परित्यज्य शुभं कर्म विधेयं। पुनश्चतुःपर्व्यां स्नानस्त्रीसङ्गकलहद्यूतक्रीडापरहास्यमात्सर्य्यक्रोधादिकषायसंगमप्रमादादि न किमपि कर्तव्यम्। प्रियेष्वपि ममता न विधेया परमेष्ठिस्मरणादि शुभध्यानं विधेयम्। सामायिकं पोषधश्च षष्ठाष्टमप्रमुखं तपश्च कर्तव्यम्। जिनपूजा च विधेया, इत्थमेतानि पर्वाण्याराधयन् जनः पुण्यान्यर्जयति। ततः क्रमेण कर्माणि क्षपयित्वा मुक्तिं याति, अतो हे कान्ते! सप्तम्यां त्रयोदश्याञ्च लोकप्रबोधाय अयं पटहोद्घोषो मदादेशात्प्रजायते। अथोर्वशी एतन्नृपवचः श्रुत्वा तन्निश्चयचमत्कृतापि मायावचनप्रपञ्चेन जगाद, हे नाथ! इदं मनुष्यत्वमिदं रूपं राज्यञ्च सर्वं तपःक्लेशादिभिस्त्वया कथं विडम्ब्यसे, यथेच्छं सुखानि भुंक्ष्व पुनर्मानवो भवः क? क च राज्यं, सद्भोगानि चेदृशाणि क। इति कर्णयोः स त्रपुतुल्यं तस्यास्तद्वचः श्रुत्वा उवाच। रे रे धर्मनिन्दाम-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लिनस्वभावे ! अधमे ! इयं तव बाणी मनागपि विद्याधरकुलाचारोचिता न दृश्यते तव सकलं चातुर्यं धिक्, रूपं वयः कुलञ्च धिक्, येन तपोजिनपूजादिकं सद्धर्मकृत्यं निन्दसि, अयि मूढे ! मनुष्यत्वसद्रूपारोग्यराज्यादीनि तु तपसैव प्राप्यन्ते तत्तप कः कृतज्ञो नाराधयेत् ? यश्च तपः नाराधयेत् स कृतघ्न एव, धर्माराधनतो देहस्य विडंबनं कथं ? धर्ममन्तरा केवलं विषयभोगादिरेव विडम्बनम् तस्माद्धर्म एवानुष्ठेयः अयं तु मानवो देहस्तस्य तु धर्म एव प्रधानः कर्तव्यः यतो मृगसिंहादयो पशव अपि अष्टम्यां पाक्षिके चाहारं न गृण्हान्ति । तर्ह्यहं कथं तं धर्मं त्यक्ष्ये । तान् वृथा मानुषदेहधारिणो नरपशून् धिक्, ये सर्वधर्मकारणभूतामिमं पर्वाराधनं न कुर्वन्ति । श्रीयुगादिजिनोपदिष्टमिद-मुत्तमं पर्व वर्तते तदहं तपो विना कंठगतप्राणैरपि वृथा न कुर्वे । हे भामिनि ! ममेदं राज्य-मद्यैव प्राणक्षयश्चास्तु परं पर्वतपसस्तु भ्रष्टः कदापि न भविष्ये ! इत्यादि क्रोधाकुलनृपस्य

For Private and Personal Use Only

वचः श्रुत्वा उर्वशी मोहमायां कुर्वतीत्थं बभाषे। स्वामिन्! भवतः कायक्लेशो माभूत
मया तु प्रेमरसत एवैतद्वचः प्रोक्तं । तस्मात् मा क्रुधः यतः पूर्वमेव पितृवाक्यवि-
मुखीभ्यामावाभ्यां स्वच्छन्दचारी वरो न वृतः सांप्रतं पूर्वकर्मविपाकादस्माभिस्त्वमेव वृतः
अतो मद्वचनविरुद्धाचरणादद्यावयोः संसारसौख्यं सर्वमेवाकस्मादिदानीं गतं। यदि
स्वाधीनपुरुषस्य संयोगो भवेत्तदैव स्त्रीणां सांसारिकसुखः स्यात्, अन्यथा तु रात्रिदिवस
संयोगवत्तयोर्विडंबनमात्र एवास्ति । हे स्वामिन्! पाणिग्रहणसमये तत्र नाभेयजिनस्य
पुरस्तात्त्वया मद्वाक्यपालनरूपः पणोऽङ्गीकृतस्तदेव त्वत्परीक्षार्थं मयाद्ययाचितः किन्तु
भवानीदृग्विधेनैवाल्पीयसा वाक्येन क्रोधवशंगतः अत एवाहमद्य सुखात् शीलाच्चापि
उभयतो भ्रष्टा अतो मम चिताग्निसेवनमेव वरं शरणं चास्ति । इति विषण्णवदनायास्तस्याः
क्रोधाग्निपूर्णं वचः श्रुत्वा तन्मग्नमानसो नृपः स्वकीयां प्रतिज्ञां स्मरन् इदमुवाच ।





For Private and Personal Use Only

हे प्रिये! इति तु सर्वमेव तवोक्तं तथ्यं परं तु कुलक्रमादागतं जिनधर्म धार्मिकाणां वंशोद्भवोहं कथंत्यक्ष्ये ? हे हरिणाक्षि! इमां सकलां पृथ्वीं कोशं गजाश्वादींश्च यथेच्छं त्वं स्वयं गृहाण परं येन न सौख्यं न च धर्मस्तदकृत्यं मां मा कारय! इति श्रुत्वा ईषद्विहस्य कोमलवाण्या सा पुनः प्रोवाच। हे राजन्! भवाद्विधानां धर्ममेव सर्वस्वं मन्यमानानां नृपाणां स्ववचनपरिपालनमेव सद्व्रतं यतो येन स्वप्रतिज्ञा नातिवाहिता स सकलधर्मप्रतिपालकोपि ह्यशुचिस्तस्य भारादियं भूमिः नितरां विषीदति हेस्वामिन्! यदि भवतेदमपि तुच्छकार्यं न सम्पादितं चेत् राज्यादिदानं कथं सम्भाव्यते। त्वदर्थमेव मया गन्धर्वाधिपत्यं त्यक्तं तर्हि मर्त्यलोकराज्यस्तव कियान्? अथ च यदि व्रतभंगकर्तुं त्वं न शक्नोसि चेन्मत्पुरत इदं जिनप्रासादमेव पातय इति तद्वचनश्रवण मात्रेणैव नृपो वज्राहत इव मूर्च्छां प्राप्य गतचेतनस्सन् भुवि पपात। किन्तु मन्त्रिण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदेशात्पार्श्वरक्षकैः परिचारकजनैः शीतलजलादिसंसेकात् पुनरुत्थापितः । अथ सूर्ययशो नृपश्चेतनां प्राप्य स्वपुरः स्थितां स्त्रियं विलोक्य तदाचरणकुपितो पुनः प्रोवाच । हे अधमे ! मच्छम्मुखाद्याहि यतस्तव वचनोद्गारः सर्पविषवन्मां खिद्यते त्वं विद्याधरपुत्री न अपि तु चांडालवंशजा प्रतिभासि । अहो ! मौर्ख्यान्मया मणिभ्रमेण काचखंडमानीतं, रे मूढे ! यस्त्रैलोक्यनाथो जगद्वन्दितः प्रभुर्जिनस्तस्य प्रासादभङ्गसदृशं महानपराधं को नाम नरपशुर्विदध्यात् ? अतः पुनरपि इयमेव ममाभ्यर्थनास्ति यत्त्वं मामनृणं कर्तुं धर्मलोपंविना अन्यद्यथेच्छं याचस्व, किन्तु पर्वलोपचैत्यविध्वंसादीन्यनर्थाणि कदापि न विधास्ये तच्छुत्वा सा उर्वशी ईषद्विहस्य पुनस्तमुवाच राजन् ! मा रोषमावह यदि त्वं चैत्यभङ्गमपि नाङ्गीकरोषि चेत् स्वपुत्रस्य शिरः स्वयं स्वहस्तेन छित्वा सद्यो मह्यं देहि । इत्याकर्ण्य राजा विमृश्य वदति स्म—हे सुलोचने ! पुत्रशिरसा किं ? पुत्रस्तु मत्त एव जातः अतो



For Private and Personal Use Only

ममैव शिरस्तव करतलस्थमस्तु इत्युक्त्वा नृपः करेण खड्गं प्रगृह्य यावत् स्वशिरच्छेदार्थमुद्यतस्तावज्झटिति सा मन्त्रशक्तिना खड्गस्य धारं बबंध, अतस्सत्वरं राज्ञा चाल्यमानोपि खड्गः न शिरश्छिनत्ति राजा च तं भ्रष्टधारं विज्ञायाऽन्यं खड्गमाददे परं न सोपि कंठोपरि चलति स्म । ततोन्यमाददे परं मनागपि सत्वादसौ भूपालो न चचाल स्थिरमना नवान् नवान् खड्गान् गृह्णाति स्म. इति दृढप्रतिज्ञं भूपतिं विज्ञाय ते स्त्रियौ स्वकीयं रूपं-प्रादुष्कृत्य सन्तुष्टमानसौ जयजयेत्यादरादुच्चार्य पुनश्च "जयत्वमृषभस्वामिकुलसागर-चन्द्रमाः । जय सत्ववतां धुर्य जय चक्रीशनन्दन" इति मुहुर्मुहुर्भाषयन्त्यौ प्रेमाकुलहृदये इत्थमूचतुः । अहो तव धैर्यमहो ते मनसो निश्चयः । यत् स्वदेहनाशेऽपि व्रतभङ्गं नाकुर्वः । देवेन्द्रः स्वसभायां सर्वैर्देवैः परिवृतो तव प्रशंसां करोति राजन् ! तवपरीक्षार्थमेव सुरेन्द्रेण प्रेषिते आवामत्र समायाते इयं रम्भा अहं चोर्वशी नामाप्सरा आवाभ्यां बहुशः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्षोभितोपि त्वं प्रतिज्ञातः किञ्चिदपि न चलितोसि अतस्त्वां क्षोभयितुं त्रिलोक्यां कोपि न समर्थः । हे जगत्प्रभुकुलावतंस ! हे वीर ! त्वयैवेयं भूमिः रत्नसूरिति सत्यं नाम बिभर्त्ति इत्थं तयोस्तुवत्योर्देवेन्द्रः स्वयमुपागत्य जयजयेति शब्दमुच्चरन् पुष्पाणि ववर्ष । तदाकृतार्थतामप्राप्तोर्वशी इन्द्रेण सोपहासं निरीक्षिता सती तत्पुरतो नृपगुणान् जगौ इन्द्रोपि तुष्टमनास्तस्मै नृपतये कुंडलाङ्गदहारादिकं दत्वा प्रणम्य च ताभ्यां सह स्वर्गलोकं ययौ । सूर्ययशोऽपि सत्यप्रतिज्ञः प्रमुदितस्सन् सन्नीत्या पृथ्वीं पालयाति स्म । अथ स राजा भरतेशवत् भूमिं जिनगृहमंडितां कुर्वन् जिनधर्मं प्रवर्तयन् नित्यं चतुर्दश्यष्टमीश्रीपर्वादिकमाराधयामास । तथा च व्रतधारिणः श्रावकान् भोजनाच्छादनादिभिर्बहुशः पूजयामास पूर्वं भरतेन कांकिणीरत्नरेखाभिश्श्रांकिताः श्रावकाः पुनः स्वर्णरेखाभिरनेनाङ्किताः कृताः । अस्य राज्ञो उदारचरिताः बहवो कुमारा आसन् । यथा ऋषभस्वामिनः प्रभावात् इक्ष्वाकुवंश





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रथितस्तथैव सूर्ययशसा सूर्यवंशो विख्यातोऽभवत् । स चैकदा पितृवत् स्वात्मानं रत्न-दर्पणे पश्यन् जातवैराग्यः संसारासारतां भावयन् विरक्तस्सन् बहून् भव्यान् प्रतिबोध्य मुक्तिं प्राप । इति निजनियमदृढपालने सूर्ययशनृपकथा ।

भव्यात्माभिरष्टाहिकापर्वणि इत्थं धर्मकर्माणि विधाय तत्पर्वाराधनीयं येनेह परत्र च सर्वेष्टसिद्धिः स्यात् ।:--

सम्पद्व्योमरसाष्टरात्रिक ( १६८१ ) मिते मासे शुचौ शोभने ।
पक्षे प्रोज्वलतायुते सुविदिते सम्यग् द्वितीयातिथौ ॥
पूज्यश्रीजिनहर्षसूरिगणभृद्राज्ये मुदाष्टाहिका-
व्याख्यानं सुगमं हितं सुविहितं श्रीजेशलाद्रौ पुरे ॥ १ ॥
श्रीमन्तो गुणशालिनः समभवन् येषामिमाः सागराः-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तच्छिष्यामृतधर्मवाचकवरा आसन् स्वधर्मादराः ॥
तच्छिष्यैर्जिनराजराजचरणाम्भोजप्रसक्तैः क्षमा---
कल्याणाभिधपाठकैस्सुमनसां श्रद्धावतां प्रीतये ॥ २ ॥
व्योमरसाष्टभूवर्षे नभोमासे सिते दले ।
द्वादश्यां मित्रवारे तु व्याख्यानमिदमुत्तमम् ॥ ३ ॥
मुनेरुदयरंगस्याग्रहाल्लिखितमादरात् ।
प्राचीनानां मतं सम्यग्विलोक्य पद्यबन्धतः ॥ ४ ॥ ( युग्मम् )

इति पर्युषणाद्यष्टाहिका व्याख्यानम् ॥

———०O०———



For Private and Personal Use Only

# अथ दीपावली व्याख्यानम् ।

श्रीः

श्रीगोतमगणाधीशो मङ्गलानि तनोतु वः
मन्त्रो विघ्नहरो यस्य नाम सिद्धार्थसिद्धिदः ॥ १ ॥

अथ श्री गोतमस्वामिनं नत्वा दीपावलिका पर्वमहात्म्यं प्रोच्यते । तद्यथा---
अथैकास्मिन्समये सन्निवेशनाम कस्मिश्चिन्नगर्यां श्रीसुस्थितसूरिनामानः सद्गुरव स्तिष्ठन्ति स्म । तत्रैव नमुचिनामैको विप्रस्संवसति स च गुरुभिस्समं विवादकरणासामर्थ्येन द्वेषं वहति स्म । तस्य तत्स्वभावत्वात् गुरुर्वस्तुनिर्विघ्नधर्मध्यानं कुर्वन्ति स्म इतश्च हस्तिनागपुरं नगरं तत्र पद्मोत्तर नाम राजा राज्यं कुरुते तस्य द्वे पन्यौस्तः आद्याजया द्वितीया च विजया तयोरेका जिन मताऽभिरता द्वितिया च परधर्मप्रतिपालिनीति, जयायाः विष्णुकुमाराभिधः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रो जातः विजयायाश्च पद्मनामा कश्चित् कुमार आसीत् । अत्रावसरे स नमुचिस्तत्रागत्य तेभ्यो दीक्षां प्रगृह्य जिनधर्ममपालयत् । तेन स पद्मोत्तरः चक्रवर्ती जातः नमुचिस्तु तदीर्ष्यया दहति स्म इतो गृहीतदीक्षस्य विष्णुकुमाराभिधस्य राजकुमारस्य तपः कुर्वतो अष्टविंशतिलंघना अभवन् । ततो अन्यदा नमुचिना नृपतिर्वरायाभ्यर्थितस्सन् सप्तदिनं यावत् राज्यपालनरूपवरमदात् । परं नमुचिनोक्तं स्वामिन् ! वरेमिदं समयान्तरे गृहीस्ये इदानीं तु निधिरूपेणायं मामकीनो वरस्त्वयि तिष्ठतु । अथैकदा चातुर्मास्यार्थं स्थितवति सुस्थिते राजातः पूर्वं प्रदत्तं वरं प्रगृह्य नमुचि राजसिंहासने स्थित्वा पूर्ववैरं स्मरन् राज्य मदेन गुरुभिस्सह महान्तमुपद्रवमकरोत् । तेन दुःखितः शिष्यसंघो गुरुणां समीपमागत्योवाच । भगवन् नमुचिना वयं सर्वे दुःखितास्म अतः कोप्युपायश्चिंत्यः । इति श्रुत्वा गुरुभिरुक्तं भो शिष्याः ! माभैषः मेरुगिरिचूलायां विष्णुकुमारस्साधुः कायोत्सर्गार्थं

For Private and Personal Use Only

स्थितोऽस्ति सोत्रानेयस्तेन भवतां कष्टनिवारणः स्यात्ः तच्छ्रुत्वा तैरुक्तं भगवन् चातुर्मास्यलंघनंकुर्वाद्भिरस्माभिः कथं तत्र गम्यते। यतो लंघनहानिः स्यात् तथा च शक्तिहीना वयं तत्र गन्तुमपि न शक्याः स्मः। तदैकेन साधुनोक्तं भगवन् तत्र गमनं प्रति तु मामकी शक्तिरस्ति परं प्रत्यागमनस्य नास्ति तथा गुरुभिः समस्तशिष्यसंघं प्रत्युक्तं भवद्भिर्निःशंकं तत्र गन्तव्यं शक्तेश्चिन्ता न विधेया इति श्रुत्वा ते तं नमस्कृत्य तत्र मेरुचूलायां गत्वा विष्णुकुमाराय सर्वं गुरूक्तमभिप्रायमकथयन्। विष्णुकुमारस्तदाकर्ण्य किञ्चिद्रोषपूरिताधर उत्थाय स्वं शरीरं वर्द्धयित्वा एकं पदं मेरुचूलायामपरञ्च जम्बूद्वीपवर्तिनि नागपुरे स्थापितवान् बभाषेचेमान्। भवन्तो यथेच्छमनेन मार्गेण तत्र गच्छन्तु न किमपि कष्टं भविष्याति सर्वं एवोपद्रवा अनेन मत्पदा प्रशामिताः एष च मामकीनः प्रभावः दीपमालिकापर्वाराधनत एव संजातः अतस्सर्वैस्तत्पर्याराधनं विधेयम्। इति तस्य महाप्रभा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वं विलोक्य सर्व एव विस्मिताऽभवन् । अथ च तं प्रणम्य क्षणेनैव तत्तप प्रभावेण तेन प्रहितास्तत्र समागताः । पद्मोत्तरनृपश्च स्वनगरे विलम्बमानं लक्षयोजनान्तरस्थितं पदं विलोक्य नागरिकमुखतो नमुचेर्दौरात्म्यं श्रुत्वा झटिति नमुचिना सह स्वयं सुस्थितसमीपमागत्य नमुचेरपराधं क्षमापयामास नमुचिस्तु तत्पादयोरपतत् स साधुस्तमुत्थाय कृपया तमपि दीक्षां दत्वा जिनधर्मानुसारिणं चकार । तत्पादस्तु तत्क्षणादेवान्तर्दधे । तद्दिनत एव दीपमालिकापर्वणो महियसी महिमा जाता । विष्णुकुमारस्तु तत्रैव मेरुचूलायां तपस्यातिष्ठत् । अतः सर्वैरेव महत्वमिच्छद्भिः श्रावकैः इदमवश्यानुष्ठेयं दीपमालिकापर्व ।—

अथ दीपमालायाः सर्वपर्वोत्तमत्वमाह । एकदा हस्तिपालाभिधः कश्चिन्नरपतिर्महावीरस्य परमभक्तोह्यासीत् स च प्रतिदिनं लेखकशालायां स्थितं चित्रनिर्मितं महावीरं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूजयति स्म श्रीमहावीरश्चास्मै प्रत्यक्षदर्शनं ददाति स्म । अथैकदा स भूपालः प्रसन्नमना प्रादुर्भूतं श्रीमहावीरं त्रिःप्रदाक्षिणीकृत्य बद्धांजलिरेवं पप्रच्छ हे परमेश्वर ! वीतराग ! मया अद्य रात्रौ गज, ( १ ) कपि, ( २ ) क्षीरद्रुम. ( ३ ) काक, ( ४ ) सिंह, ( ५ ) कमळ, ( ६ ) बीज, ( ७ ) कुंम्भानि ( ८ ) क्रमश अष्टवस्तूनि स्वप्ने दृष्टानि अतो भगवन् तेषां फलं प्रकाशय किं भविष्यति ? श्रीमहावीरस्तच्छ्रुत्वोवाच राजन् ! शृणु यत्त्वया स्वप्ने गजो दृष्टस्तत्फलमिदम् । यत्कलौ हस्तितुल्याः श्रावकाः मदोन्मत्ताः सन्तः दुःखागारे गृहे एव निवसिष्यन्ति न प्रव्रजिष्यन्ति न च दीक्षां गृहीष्यन्ति । एके च गृहीतामपि दीक्षां कुसंसर्गतस्त्यक्ष्यन्ति केऽपि सुश्रावकाः विरला एव दीक्षां पालयिष्यन्ति । इति गजफलम् ॥ १ ॥ कपिफलं शृणु, केचन कपितुल्य-चञ्चलस्वभावा अल्पसत्वा आचार्यसम्मुखे चापल्यं करिष्यंति धर्मस्थानतपोधनांश्च

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 



हसिष्यंति एके च गृहस्थाःप्रव्रज्याविमुखाः भविष्यन्ति धर्माधर्मपरास्तु विरला एवेति प्लवङ्गमदर्शनफलं जानीहि ॥ २ ॥ क्षीरद्रुमफलन्तु शृणु ये तु क्षीरद्रुमतुल्या जिनशासन-भक्ताः श्रावयकास्तेस्मिन्युगे बंबूल वृक्षैरिव कुलिंगधारिभिः प्रतिरुद्धाः भविष्यान्ति तथा चैते कुलिंगतः सुविहितविहारक्षेत्रभूमिं गृहीष्यन्ति एतत् क्षीरद्रुमफलम् ॥ ३ ॥ काकस्य फलं यथा, राजन्! केचन काकवत् चञ्चलस्वभावाः ग्राह्याग्राह्यवस्तुविचारशून्याः भविष्यन्ति धूर्तास्तु मूर्खैस्सह मिलित्वा विहरिष्यन्ति तथा च सुविहिततपोधनान् सुश्रावकान् साधून् नितान्तं पीडयिष्यन्ति इति काकफलम् ॥ ४ ॥ सिंहफलं शृणु, अत्र भरतक्षेत्रे सिंहप्राय-मपि जैनमतं धर्मवर्जितं कुलिंगिभिर्दुष्टैर्विनश्याति विनाशं च यास्यति । शुद्धलिंगिनश्च समयप्रभावेण पराभविष्यान्ति इदं सिंहस्वप्नफलं ॥ ५ ॥ कमलफलं शृणु, यथा अतिसुगं धियुक्तैः पद्मैरपि तरोर्जलं गन्धयुक्तं न भवति तथैव कुलीना धार्मिका अपि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कलौ जिनधर्मानुसारिणो न भविष्यन्ति किन्तु नीचाऽधार्मिका भविष्यन्ति इति कमलफलम् ॥ ६ ॥ बीजफलं शृणु यथा शुद्धमपि बीजं ऊषरभूमौ क्षिप्तं वर्षं वा क्षेत्रस्वामिनः फलाय न भवति आपि तु स्वयमेव नश्यति तथैव अपात्रे उपदिष्टंधर्मं न फलाय स्यात् किन्तु स्वयमेव विनाशमान्पुयात् इति बीजफलम् ॥ ७ ॥ कुंभफलं श्रृणु, अस्मिन् कलिकाले क्षम दिगुणे चारित्र जलपूर्णा कुंभा इव महर्षयस्तोका भविष्यन्ति केचन तु गीतार्थाः सम्यग्व्यवहारेण अन्योन्य तारणपरा भविष्यन्ति यथा ग्रहिलेन जनेन ग्रहिलो जातस्तथैव । नृप एतच्छुत्वा पुनरपृच्छत् भगवन् एतत् कथं । महावीरः कथयति ।

पृथ्वीपुरी नाम नगर्य्यां पूर्णनामा महीपतिरासीत् । तस्य सुबुद्धिनामा कश्चिदमात्यः एकदा तेन मन्त्रिणा लोकदेवो नैमित्तिकः पृष्टः यत् भो नैमित्तक ! किंचित् ज्ञानं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रकाशय इति। तेनोक्तम् भोमंत्रिन्! श्वः अमावास्यानन्तरं मेघो वर्षिष्यति यस्तु तज्जलं पास्यति स सर्व एव लोको ग्रहिलो भविष्यति ततः कियत्यपि काले गते सुवृष्टि-र्भविष्याति तदा सर्वे लोकाः पुनः स्वस्थाः भविष्यन्ति अतः सर्वैरेव नगरनिवासिभिस्तद् वृष्टिजलं न पेयमिति श्रुत्वा मंत्री जातविस्मयो नृपसमीपमागत्य सर्वमाचख्यौ। राजा च तदाकर्ण्य पटहताडनया वारिसंग्रहार्थं श्वो भाविन वृष्टेर्जलं पानादिषु न ग्रहणार्थं समाज्ञापयत्। ततः सर्व एव तस्यां निशायां जलसंग्रहं चक्रुः श्वस्तु महीयान् जल-दो ववर्ष परं केऽपि राजाज्ञया तज्जलं न पपुः। किन्तु बहुषु दिनेषु व्यतीतेषु संगृहीतं जलं निश्शेषमभवत्, अतस्तामाज्ञां विगणय्य मूढैर्नगरनिवासिभिर्बहुभिः राजपुरुषैश्च तद्वृष्टिजल-मेव पीतं ततस्तेन पीतमात्रेणैव सर्व उन्मत्ता बभूवुः। किन्तु राज्ञा मंत्रिणा च तज्जलं न पीतमतस्तावेव सर्व स्मिन्नगरे स्वस्थावास्ताम्। अथ च पीतजलास्सामन्तादयो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जातोन्मादाः कदाचित् हसंतो कदाचिच्च रुदन्तः भूताविष्टा इव नृत्यं कुर्वन्त असमंजसमश्लीलादिकं ब्रुवन्तः नग्नीभूय इतस्ततो विहरन्तः केवलं भूपतिं मंत्रिणञ्च विपरीतविचारिणं विलोक्य चिन्तितमनसस्तावेव राजकार्यानर्हौ विलोक्य परस्परं मंत्रयांचक्रुः। यत नूनं राजा मन्त्री च द्वावेव ग्रथिलौ उन्मादरोगग्रसितौ जातौ यतः विरुद्धमाचरतः । अतोऽस्माभिर्नृपासने मन्त्रिपदे चान्यः काश्चिदारोपणीयः। इति मंत्री तेषां मन्त्रणामाकर्ण्य खिन्नमनाः नृपाय सर्वमकथयत्। नृपस्तच्छ्रुत्वोवाच भो मंत्रिन् ! इदानीं कथंचिदात्मरक्षा कार्या न चेदिमे आवां घातयिष्यन्ति। मन्त्रिणोक्तं राजन् ! एषु सर्वेष्वेकमतानुसारिषु न ह्यावयोस्थितिः स्यादतः ग्रथलीभूय स्थातव्यमिदमेवात्मरक्षणोपायः श्रेयान् । इदमेव च समयोचितं कर्म । राजा च तदाकर्ण्य स्वयमपि मन्त्रिसहितस्तेषां सदृशमेवोन्मत्तवत्समाचरन् तेषु मिलितः। ततो गतवति कियत्यपि काले पुनः सुवृष्टिरभवत् तज्ज-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लपानमात्रेण च सर्व एव स्वस्था अभवन् । अत एवोच्यते यत् विषमकाले समयानु-
सारतए वाचरणं बुद्धिमद्भिर्विधेयमिति ८ ॥

इति महावीरमुखादाकर्ण्य प्रतिबुद्धो राजा श्रीवीरस्य पादयोरुपर्यपतत् अथ च तत्कृ-
पया जातवैराग्यः क्रमेण देवमाराध्य मोक्षमवाप अत्रैव भगवता पञ्चमारकस्वरूप-
मप्युक्तं । यथा—

मत्तःपञ्चसप्तत्यधिकचतुःशता ( ४७५ ) द्व्यतीते सति विक्रमादित्यनामको राजा
भविष्यति । ततः किंचिदूनचतुर्विंशत्यधिकशतवर्षानन्तरं पाटलिपुरनाम्नि नगरे यशो-
नामावकुशगृहे यशोदाकुक्षौ जयाभिधस्य संवत्सरस्य चैत्रकृष्णाष्टम्यामर्द्धरात्रिसमये
त्रयोदशमासान् यावद्गर्भे स्थित्वा विष्टिकरणे भौमवासरे मकरलग्ने अश्लेषानक्षत्रस्य
प्रथमपादे कर्कराशिस्थिते चन्द्रे ऐन्द्रयोगे चतुर्मुखस्य जन्म भविष्यति स च हस्तत्रय-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शरीरः कपिलकेशस्तीक्ष्णनेत्रः गर्दभगलः नागलाञ्छनो विशालहृदयः शीलगुणरहित ईदृशः कलंकी–तज्जन्मतः पञ्चमे वर्षे दुर्भिक्षः सप्तमे अग्न्युपद्रवः एकादशे धनप्राप्ति-रष्टादशे वर्षे कार्तिककृष्णप्रतिपत्तिथौ स्वातिनक्षत्रे तुलराशिस्थिते चन्द्रमसि बवकरणे शुभवेलायां रात्रगमुहूर्ते महाराजस्यास्य कलंकिनः पट्टाभिषेको भविष्यति, तदा स दुष्टः रौद्ररूपधृक् महातेजस्वी राजमदान्वितः बहुद्रव्यव्ययेन विक्रमसम्वत्सरमुत्थाप्य स्वयं सम्वत्सरं प्रवर्तयिष्यति एष च एकविंशतिमे वर्षे भरतार्द्धविग्रहिणो कर्षणनृपस्य सुतां परिणेष्यति सर्व एव तत्समकालीना भूपालास्तस्य सेवां करिष्यन्ति । स च पाटलिपुरे स्वं राज्यं पालयिष्यति म्लेच्छैस्सह क्षत्रियाणां महीयान् विग्रहो भविष्यति यस्मिन्नेषा भूमिः रुधिरार्द्रा भविष्यति, । तत्कोशे च नवनवतिकोटिपरिमितं धनं चतुर्दश सहस्राणि हस्तिनः सप्तलक्षाश्च रथाः चतुर्दशलक्षाश्चाश्वाः पञ्चकोटिपदातयश्चेत्येवंविधा तस्य महती

For Private and Personal Use Only

सेना भविष्यति । ततः पञ्चाशद्वर्षे व्यतीते सति तस्य जङ्घायां खड्गप्रहारो लगिष्यति एवं २४५३ वर्षेषु निर्वाणाद्गतेषु भाद्रपदशुक्लाष्टमी रवौ ज्येष्ठानक्षत्रे स लोभिष्ठो लम्पटः स्वराजधान्यां भिक्षावृत्तिधारिणो साधून सुश्रावकान् दृष्ट्वा समीपमाहूय कथयिष्यत्येवं भवद्भिर्भिक्षायाः षष्ठमांशः करस्वरूपं राजकोशे देय इति निदेशं श्रुत्वा खिन्नान्तैस्तै-स्साधुभिरिन्द्रस्समाहूतः । इन्द्रश्च तैर्धार्मिकैराहूतमात्र एव वृद्धब्राह्मणरूपं कृत्वा तत्रागत्य कलंकिनं प्रत्युवाच राजन् ! त्वं चक्रवर्ती क्षत्रियोसि अतो भिक्षान्नभागस्त्वया न ग्राह्य इति तस्य वचः समाकर्ण्य क्रोधावस्फुरिताधरः कलङ्की प्रत्युवाच । भो किंकराः ! एष ब्राह्मणो बहिर्निस्सारणीयः इत्युक्तमात्र एव तस्मिन् कुपितो इन्द्रस्तमुत्थाय धरणीतले पातयित्वा ह्यपोथयत् तेन च सद्य एव स मृतस्तत्प देवेन्द्रेण तस्यैव पुत्रो दत्तनामा स्थापितः प्रोक्तं च. हे राजकुमार ! त्वं मयास्मिन्नृपासने



For Private and Personal Use Only

स्थापितोसि परं तात इवाचरणं न विधेयम् न चेत्तद्रत्त्वमपि दुःखभाग्भविष्यासि यदि मद्वचनानुगस्सन् धर्मेण राज्यं पालयिष्यासि चेत्तवाक्षया कीर्तिर्भविष्याति । राजन् ! साधुसंघेषु भक्तिर्विधेया देवगृहेषु च महोत्सवादिकं कार्यं श्रावकाश्च दानमानादिभिः पूज्याः जिनधर्मं च समादरणीयमित्युक्त्वा तेन पूजितः सुरेन्द्रः स्वर्गलोकं जगाम । गते इन्द्रे स दत्तः जैनधर्मं सम्यक् प्रवर्तयिष्यति तेन एकोनविंशति वर्षाणि यावत् शुचि सुभिक्षं भविष्यति । अस्मिन्नेवावसरे आरकप्रान्ते दुःप्रसहनामासूरिर्भविष्यति तथा च त्रयस्त्रिंशलक्षचतुःसहस्रचतुःशतैकादशमिता अगुणाचार्याः पंचपंचाशलक्षपञ्च पञ्चाशत्सहस्रपञ्चशपंचपञ्चाशत्प्रमिता अधर्माचार्याः पञ्चपञ्चाशत्कोटिलक्षचत्वारिंशन्मिताश्चोपाध्यायाः भविष्यति एषु व्यतीतेषु दुःप्रसहाचार्यः, फाल्गुनी नाम्नी साध्वी, मांगलिकश्च श्रावकः, सात्यकी नाम्नी च श्राविका आगमेषु दशवैकालिक सूत्रञ्च एतस्मिन्नेव काले भवि-

ष्यति। ततो पञ्चमारकप्रान्ते षष्ठारकाद्यदिने उपाश्रयप्रथमे प्रहरे दशवैकालिक्यां व्याख्यायतां उपाश्रयोपरि पतनाधर्मविच्छेदो भविष्यति ततो द्वितीयप्रहरे धर्महीनत्वं तृतीये च राजराज्ञोर्मृतिश्चतुर्थे च अग्निविच्छेदः अत एव सर्वं व्यवसायोपि विच्छेदतां प्राप्स्याति ततो सर्वे लोका अधर्मानुयायिनो भविष्यन्ति अतः सूर्यः प्रचण्डकिरणस्सन् अग्निवदुदेष्यति तेन ग्रामाकरनगरादीनां प्रलयो भविष्यति पृथ्वी दुःखसंकीर्णा वनस्पतिपर्वतादीनां च क्षयो भविष्यति, तदा श्रीशत्रुञ्जयः मनुष्यपशुपक्षिप्रभृतीनां बीजान्यादाय वैताढ्याद्रिपार्श्वसमीपं गंगासिंधोरुपरि स्थापयिस्यति। तस्मिन्नतिभयानके कलौ सार्द्धाष्टषष्टियोजनवाहिनी गंगा स्वल्पजला बहुजीवपरिवृता दिने न निस्सरिष्यति अपि तु सर्वेषां जीवधारिणां प्लवनाय रात्रावेव निस्सरिष्यति तत्र च मलिनान् द्विहस्तदेहान् वस्त्रादिभिर्वर्जितान् नग्नान् जनान् नीत्वा सागरे पातयिष्यति। ते च मन्दभाग्याः



For Private and Personal Use Only

धर्महीनाः शरीरं विहाय नरकं यास्यन्ति। तत्र चास्मिन्समये नराणां विंशतिवर्षाणि परमायुः षड्वर्षास्त्रियो गर्भं जनयिष्यन्ति, गर्भञ्च मासमात्र एव वहिष्यन्ति ईदृशे षष्ठारके गते प्रथमारक एकविंशतिसहस्त्रवर्षमानः पूर्ववदैवत्यो द्वितीयारको भविष्यति तत्र च पुष्करावर्ताभिधाः मेघाः सुवृष्टिं विधास्यन्ति तेन पुनर्धान्यादीनामुत्पत्तिर्भविष्यति एवमेकविंशतिवर्षानन्तरं विमलवाहनादीनि सप्तकुलागाराणि भविष्यन्ति। तत्र च पृथ्वी ग्रामनगरजनाकीर्णा बहुसस्याढ्या गृहे गृहे मङ्गलघोषपूर्णा भविष्यति, तत्कालीना जनाश्च सदाचारनिरता यदा भविष्यन्ति तदैव द्वारापुर्यां सुमतिनाम्नो राज्ञः गृहे भद्राकुक्षौ श्रेणिकराजजीवः प्रथमतीर्थंकरत्वेनोत्पत्स्याति स च वीरसत्तमः सप्तहस्तदेहमानः स्वर्णाभो सिंहलाञ्छनः द्विसप्तत्यब्दायु पुनः धर्मस्थापनां करिष्यति स च कार्तिकामायां मम इव मोक्षं यास्यति, स्वकीयमोक्षावसरमवसन्नं विज्ञाय स एव महात्मा वीरपाटकनगरे देव·

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







शर्मब्राह्मणप्रतिबोधार्थं गत्वा तं च प्रतिबोध्य अमावास्यार्द्धं रात्रौ विजय मुहुर्ते परमपदं या-
स्यति एनमेव गोतमवीरं व्याहरन्ति महात्मानः एष च परमपदप्राप्त्यवसरे अष्टादशान् नृप
तीन्स्वपुरतः कृत्वा यदा गन्तुमुद्यतस्तदा चतुः षष्टिमितेन्द्राः बहवोन्ये देवा देव्यश्च प्रादुर्भू
याकाशे तद्दर्शनार्थमागताः स्वयं महावीरोपि तत्सम्मुखीभूय दर्शनं ददौ । सच महात्मा-
तान् देवादीन् विलोक्य तं महावीरञ्च दृष्ट्वा भक्त्या प्रणम्य उवाच । हे वीर! मामुक्त्वा
परमपदेगते भवति मां सर्वत्रैव संकीर्णता प्रतिभाति अतस्तवान्तिक एव समायातुमु-
द्यतोस्मि । इत्याकर्ण्य भगवतोक्तं हे वीर ! त्वं वीतरागोसि इदं संसारं मृषा
जानीहि स्वयंममान्तिके यातुमुद्यत इति वरीयान् एवमुक्त्वा देवस्त्वन्तर्हितस्तत-
स्तस्मिन्नेवविजयमुहूर्ते श्रीगौतम उत्पन्नकेवलज्ञानो दिव्यलोकं प्रापः । अथ च मोक्षं
गते वीरगौतमे इन्द्रादयः सर्व एव देवाः पुष्पाणि वर्षन्त आकाशे दीपावलिभिः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकाशं कुर्वन्तः स्वानि लोकानि ययुः । तद्दिनत एव एतद दीपमालापर्व अतीवोत्कृष्टं जातं अतः सर्वैरेव श्रावकैरस्मित् पर्वणि । महोत्सवः कार्यः दीपमाला च कर्तव्या चैत्येषु नानाविधानि मङ्गलानि कार्याणि केशरचन्दनकर्पूरागुरुभिर्देवपूजां विधाय श्रीगौतमस्वामिनश्च यथाशक्ति षष्ठादितपसाराधनं कार्यं दीपमालिकामहात्म्यञ्च श्रोतव्यम् एवमस्मिन् दिने महोत्सव देवताराधनादि दिव्यकर्म कुर्वतां धार्मिकाणां वर्षैकं यावत् श्रीमहावीरः मनोवाञ्छितानि पूरयति । अस्य पर्वणः समुत्सवप्रभावात्, आरोग्यतां सुखं समृद्धिं लब्ध्वा लोकाः सर्वसम्पद्भाजो सुखिनश्च भवन्ति । इति दीपमालिका महात्म्यव्याख्यानं समाप्तम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ ज्ञानपञ्चमीव्याख्यानं प्रारभ्यते ।

ज्ञानं सारं सर्वसंसारमध्ये, ज्ञानं तत्वं सर्व तत्वेषु नित्यं ।
ज्ञानं ज्ञेयं मोक्षमार्ग प्रवृत्यै, तस्माद्ज्ञानान्नापरो मुक्ति हेतुः ॥ १ ॥

ज्ञानप्राप्त्यैतु कार्तिकशुक्लपञ्चम्या आराधनं युक्तं तस्या एव महात्म्यं कथा प्रसंगे यथा । जम्बुद्वीपान्तर्वर्तिनि भरतक्षेत्रे पद्मपुरं नाम नगरमासीत् । तत्र च महान् वीर अजितसेननाम राजा बभूव तस्य सर्वलक्षणसंयुक्ता यशोमती नाम पट्टराज्ञी, तयोर्दम्पत्योः वरदत्तनामा कुमारोऽभूत् । सच रूपलावण्ययुक्तः द्विसप्ततिकलानिधिरष्टवर्षीयो विद्याध्ययनार्थं पण्डितमाहूय राज्ञा समर्पितः पण्डितश्च तमानीय सादरं पाठयति परं स चाक्षरमपि सुखेन नोच्चारयति किं पुनः पठनवार्ता ? । अथ कालेन स राजकुमारः सम्प्राप्तयौवनो बभूव परं किञ्चिदपि विद्या न समधिगता । ततः कियता



For Private and Personal Use Only

कालेनाष्टादशवर्षं प्रति समागते वयसि वरदत्तस्याष्टादशविधेन कुष्टेन सर्वशरीरं व्याप्तं तेन महान् दुःखितो बभूव। राजपुरुषा राजा राज्ञी च पुत्रशरीरं कुष्टरोगव्यापितं दृष्ट्वा तीव चिन्ताकुला बभूवुः। एतस्मिन्नेव समये अस्य राज्ञः राजधान्यां श्रीसिंहदासनामा कश्चित् श्रेष्ठी वसति तस्य कर्पूरतिलका नाम जिनधर्मपरायणा काचित् पत्नी आसीत् तयोर्गुणमंजरी नाम पुत्री बभूव सा क्रमेण यौवनं प्राप्ता सती पूर्वकर्मवशात् बहुभिः कुष्टाद्य-साध्यरोगैः परिवृता मुखतो मूका च बभूव। तस्य श्रेष्ठिनः सप्तकोटिमितं धनमास्ति। अथ च श्रेष्ठी जातयौवनां पुत्रीमुद्वाहयितुं यतते स्म परं न कोपि तां बहुरोगिणीं मूकां च श्रुत्वोद्वाहयति येषां पुरतस्तस्याः सम्बन्धवार्तां करोति त एव कथयन्ति अहो? कुष्टव्याप्तशरीरायाः वक्तुमप्यसमर्थायास्तव पुत्र्याः सह को नामपुमान् पाणिग्रहणं कुर्यात? यस्याश्च दृष्टमात्राया एव ग्लायते नितरां चेत इति।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







श्रेष्ठिना तस्या उपचारार्थं अनेकान् वैद्यानाहूय बहुशो भेषजादिकमपि कारितं परं न मनागपि व्याधेः शान्तिर्जाता अतस्तस्या दुःखेन सर्व एव परिवारो दुःखितस्सन् विमना आस्ते। अथैकदा श्रीविजयसेनाचार्याभिधः कश्चिज्जैनसिद्धो ज्ञानवान्मुनिः स्वशिष्यवृन्दैः परिवारितो यथेच्छं पृथिव्यामटन् तत्र समागत्य ग्रामाद्बहिस्तपश्चर्यार्थं तस्थौ। तस्य दर्शनार्थं सर्व एव नगरनिवासिनः सपरिवाराः गच्छन्ति स्म। तत्प्रभावं जनमुखाच्छ्रुत्वा स सिंहदासोपि सकुटुम्बस्तद्दर्शनार्थमाययौ राजा चापि पुत्रसहितो मन्त्रिभिः परिवृतस्तद्दर्शनार्थमगमत्। ते च सर्वे तं महात्मानं प्रणम्य तदनुज्ञापिता आसनेषूपविष्टाः ज्ञानमहिमां पप्रच्छुः। स उवाच, भो भव्याः! इदं विश्वं ज्ञानसारमेवास्ति अतो सर्वैरेव ज्ञाने भक्तिर्विधेया न हि कदापि ज्ञानस्तु निन्द्यः मनसा वचसा कायेन च ये ज्ञाननिन्दां प्रकुर्वते तेषां कदाचिद-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्युभयलोके न सिद्धयतः यतो ज्ञानेन विना जीवा अपि जीवान् न जानन्ति अतो ज्ञानमेवाराधनीयम् । ये च पापिष्ठाः मनसा ज्ञानं निन्दन्ति तेषां मनः शून्यं भवति, वचसा तद्विरोधनेन मूकत्वं मुखस्तम्भं च भवति कायेन ज्ञानविरोधात् कुष्टादिमहारोगाणां प्राप्तिः, त्रिभिरेभिर्मनोवचनकायमिस्तद्विरोधात् धनधान्यपुत्रकलत्रादीनां क्षयो नानाविधदुःखस्य च प्राप्तिर्भवति इति उपदेशं कुर्वति तस्मिन् तदवसरं विज्ञाय सिंहदासेनोक्तं "भगवन्! एतदेवाहं पृच्छामि यदस्या मम पुत्र्याः गुणमञ्जर्याः शरीरे केन कर्मणा ईदृग्विधा रोगाः समुत्पन्नास्तेनातीव दुःखितोहंमतः कृपयास्याः कर्माणि ब्रवीतु भवन्तः" स मुनिरित्थं श्रुत्वा प्रत्युवाच ।

भोश्रेष्ठिन ! अस्याः पूर्वकर्मकथां शृणु । धातकीखण्डद्वीपमध्ये पूर्वदिशि खेटक नाम नगरमभवत् तत्र जिनदेवनामा श्रेष्ठी वसति स्म । तस्य सुन्दरी नाम भार्यासीत् । अथ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च तयो आसपाल ( १ ) तेजपाल ( २ ) गुणपाल ( ३ ) धर्मपाल ( ४ ) धर्मसारे ( ५ ) ति पञ्चपुत्राः लीलावती ( १ ) शीलवती ( २ ) गंगावती ( ३ ) गंगे ( ४ ) ति चतस्त्रश्च कन्यकास्समभवन्- जिनदेवश्रेष्ठिना स्वकीयाः पञ्च एव पुत्राः पठनार्थं गुरुसमीपे प्रेषिताः परं ते पंडितेन पाठ्यमाना अपि झटिति रुदन्तो मातुस्समीपमागत्य तिष्ठन्ति स्म माता च स्नेहवशात्तानाश्वास्य लाडयामास ब्रूते च हे पुत्रकाः ! एतादृशेन पठनेनालं यदि न रोचते चेद्यथेच्छं क्रीडत, पठनेन किं भविष्यति ? इति सम्भाष्य तेषां पुस्तकपट्टिकादीनग्नौ प्राक्षिपत् पंडितं चाहूयाभर्त्सयत् एवं कियति काले गते मात्रा लालमानारहर्निशं क्रीडामेव कुर्वन्तस्ते यौवनं प्राप्ताः पुत्रिकाश्चापि क्रमेण संजातयौवनाः बभूवुः । अथ च जिनदेवस्तान् स्वपुत्रान् विद्यया रहितान् विज्ञाय पत्नीमकथयत्-भद्रे ! इमे पुत्रास्त्वया न पाठिताः अतो विद्यां विना कथं स्वां



For Private and Personal Use Only

जीविकां निर्वाहयिष्यन्ति कश्चेमान्कन्यकाश्च दास्यति कथमेतेषां च व्यवसायसिद्धि र्भविष्याति। सा श्रुत्वा क्रोधताम्राक्षी प्रत्युवाच—पुत्राणां शिक्षणभारस्तु पितुरुपर्य्येव अहन्तु नारी अतः पठनपाठनविधिं कथं जाने ? श्रेष्ठी तु तच्छ्रुत्वा विमना एव कर्मणोगतिर्बुध्वा प्रतिजगाम। स तु नित्यमेव धर्मकृत्यं कुरुते स्म धार्मिककृत्येषु मुक्तहस्तश्चासीत्। अथ कियता कालेन ते विवाहयोग्याः बभूवुः परं न कोपि तेभ्यः कन्याः प्रयच्छति यत उक्तं च "मूर्खनिर्द्धनदूरस्थशूरमोक्षाभिलाषिणां। त्रिगुणाधिकवर्षाणां कन्यादानं न शस्यते" इति। ततः कियति कालेगते सति स जिनदेवस्तानतुद्वाहितान् ज्ञात्वा चिन्तया क्लिन्नमनाः स्वकीयां स्त्रियमुवाच रे मूढे ! तव दोषेणैवेमे मूर्खाः जाता यतस्त्वं वाल्य इमान् नापाठय अपि तु पुस्तकपट्टिकामप्येतेषामग्नावाक्षिप दतोहमद्य किं कुर्वे, साचैतच्छ्रुत्वा कुपिता प्रत्यवदत् कथमेतेषां मूर्खत्वे मम दोषोस्ति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रे पापिष्ठ ! दुष्ट ! स्वयमेव दोषं कृत्वा ममाग्रे एवं ब्रवीषि त्वं पापिष्ठोसि तव पितापि पापिष्ठः येन त्वमेवं कुशिक्षित इति-श्रेष्ठी एतद्वचः श्रुत्वा क्रोधेन प्रज्वलितनेत्रः पाषाणमुत्थाप्य तस्याः शिरसि प्राक्षिपत् । तेन चूर्णितमस्तका सा सद्य एव प्राणान् परित्यज्य भूमौ पपात, सा एव सुन्दरी अस्मिन् भवे तव पुत्री जाता पूर्वजन्मजन्यज्ञानविरोधेन चास्यास्सकलमेव शरीरं कुष्टादिभयंकररोगैर्व्याप्तमस्ति इति तस्य महामुनेर्मुखात् पूर्वभवकथामाकर्ण्य गुणमंजर्य्या जातिस्मरणं समुत्पन्नं । तथा च तत्पूर्वजन्मकर्मादिकस्मरणेन संजातरोमांचा मूर्च्छां प्राप्य भुवि पपात, किन्तु परिचारकास्तां शीतोपचारादिभिस्समुत्थापयामासुः । अथ च श्रेष्ठिना पृष्टं भगवन् ! एतेषां रोगाणां विलयोपायं ब्रवीतु भवान्, । गुरुरुवाच "पढमंनाणंतउदया" इति वचनात् प्रथममेषा ज्ञानभक्तिः करोतु तथा च पञ्चमीतप उपवासादिकं प्रत्याख्यानमेनां कारय विधिना,



For Private and Personal Use Only

जिनदेवोक्ता विधिस्तत्रानुष्ठेया इति श्रुत्वा श्रेष्ठिनोक्तं तर्हि तस्य विधिरपि कथ्यतां। मुनिरूचे।

शुक्लपञ्चम्यां पट्टादिषु ज्ञानपुस्तकं संस्थाप्य तत्र श्वेतधान्येन स्वस्तिकं विलिख्य पुरतः पञ्चवार्तिकं दीपं निधाय पञ्चफलानि च तत्र स्थापयित्वा यथोक्तविधिना गन्धोपचारैः सम्पूज्य तदधिष्ठातृदेवतां सम्प्रार्थ्य उपवासविधिना तद्दिनमतिवाहयेत् । एवं पञ्चवर्षाणि पञ्चमासांश्च यावत् सर्वा एव शुक्लपञ्चम्य आराधनीयाः। यदि मासि मासि कर्तुं न शक्या चेत् कार्तिकमासस्य शुक्लपञ्चमी तु यावज्जीवमाराध्या अर्थात् वर्षं वर्षं प्रति एष एवैका पंचमी आराधनीया। एवं कृते सत्यस्या अचिरेणैव कालेन रोगशान्तिर्भविष्यति सौभाग्यरूपलावण्यादिगुणाश्च प्राप्स्यन्ते । अस्यानुष्ठानेन नरः सर्वर्द्धिपरिपूर्णो भवति पुत्रपौत्रादिसौख्यं वृद्धेर्बाहुल्यं च भवति"–इति गुरुवचनं श्रुत्वा कृताञ्जलिः स श्रेष्ठी पुनरपृच्छत्–'भगवन्! रोगाधिक्यात् सर्वासां प-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टमीनामुपवासकरणे तु नास्याः शक्तिः परमेका कार्तिकपंचमी यावज्जीवमवश्यं करिष्यति किन्त्वस्या सामान्या विधिः कथनीया। इति श्रुत्वा श्रीविजयसेनाचार्यः कथयति पञ्चमीदिने पट्टकं मंडयित्वा पञ्चपुस्तिकाः मुक्तापुष्पैः सम्पूज्य धूपदीपादीन् निवेद्य पञ्चवर्णधान्यानां पञ्चराशयस्तत्र कृत्वा पञ्चविध पक्वान्ननैवेद्यञ्च समर्प्य स्वगुरुमभिवाद्य "ॐ नमो नाणस्स" इति द्विसहस्राष्टोत्तरशतं जपेत्। पारणमपि विधेयम् उद्यापनस्यापीयमेव रीतिः या पूर्वं तवाग्रे कथिता इति श्रुत्वा गुणमञ्जर्या सर्वमेवैतत् कृत्यं स्वीकृतम्।

अथ चैतस्मिन् समये तत्रोपविष्टेन राज्ञापि पृष्टं 'भगवन्! मम पुत्रस्यापि इयमेव व्याधिर्वर्तते तथा च तं विद्यापि नाभ्युपैति अतस्तस्य कर्मविपाकोपि कथनीयः' गुरुणोक्तं हे महाराज! तव पुत्रस्यापि पूर्वजन्मभवां कथां शृणु, जम्बूद्वीपवर्तिनि भरत-क्षेत्रे श्रीपुरंनाम नगरमभवत् तत्र च वसुनामा श्रेष्ठी वसति स्म तस्य द्वौ पुत्रौ आस्ताम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र यो ज्येष्ठस्तस्य वसुसार इति नाम कनीयसश्च वसुदेव इति नाम आसीत् । अथ कियता कालेन तौ द्वावेवसम्प्राप्तयौवनौ क्रीडार्थं वने विरहन्तौ कदाचित् तस्मिन्नेव वने श्रीमुनिसुन्दरसूरिण आश्रमे सम्प्राप्तौ--मुनिश्च तौ सत्कृत्य कुशलवार्तादिकमपृच्छत् तौ च प्रणतिपुरस्सरं सर्वं निवेद्य ज्ञानकथनाय मुनिमभ्यर्थयताम्--स चोवाच हे श्रेष्ठिकुमारौ ! इदमशेषमपि संसारं निस्सारं जानीतः यतो यत् प्रातस्तन्मध्यान्हे न यच्च मध्यान्हे तन्निशि न निरीक्षते अतोस्मिन् संसारे सर्वेषामेव पदार्थानामनित्यतास्ति । इति वाक्यैः प्रतिबोधितौ तौ निश्चलं ज्ञानमवाप्य दीक्षां जग्रहतुस्तयोश्च वसुदेवाचार्येण सर्वमेव सिद्धान्तमशेषञ्च जिनधर्मतत्वं गृहीतं द्वितीयेन वसुसारेणापि दीक्षा गृहीता। परन्तु स मौर्ख्यात् नित्यमेव ज्ञानं द्वेष्टि—अथ च तयोर्मध्ये वसुदेवं ज्ञातचतुष्टयं विज्ञाय गुरुः पञ्चशतसाधूनामुपर्य्यधिष्ठातृपदे नियुक्तवान् । सचाहर्निशं साधून् धर्मचर्यां श्रावयति स्म ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एकदा शयनानन्तरं संस्तारके सुप्तवति तस्मिन् एकः साधुः समागत्य धर्ममपृच्छत् । स चा-त्थाय तस्मै धर्ममकथयत् । तस्मिंश्च गते पुनरेकोपरस्साधुस्समागतस्ततोस्मै तेन धर्मकथाकथनमारब्धं--एवं कियता कालेन स वसुदेवः सर्वेषु पूज्यो जातः—

अथ च व सुसारः अहर्निशं गतागतान् स.धून् विलोक्य खिन्नमना अतीव विषादं प्राप्य एवमचिन्तयत् अहो मूर्खत्वमेव बरं यतस्तस्यनकाचिदपि चिन्ता न चाहर्निशं पठनपाठनकार्यञ्च भवति यतो ममज्येष्ठभ्राता सुखेन स्वपतिः न कोपि तत्समीपे गत्वा किमपि पृच्छति नित्यं स आनन्दमग्नमानसो कालमतिवाहयाति मां तु-स्नानभोजनादीनामप्यवकाशो नास्ति अतोहमपिमूर्ख एव भूत्वा इतः परं मौनमेव धारयन् तिष्ठामिचेत् सुखीस्याम् मोर्ख्ये बहवोगुणाः दृश्यन्ते सत रुचिरं .यतस्तस्मिन्नि मेष्टौगुणास्तु प्रथिता एव सन्ति यथा उक्तंच “निश्चिन्तो ( १ ) बहुभोजनो ( २ )

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रपमनाः (३) नक्तं दिवाशायकः (४) कार्याकार्यविचारणादि रहितो (५) मानापमाने समः ॥ (६) प्रायेणामयवार्जितो (७) हि बपुषा हृष्टश्च पृष्टश्चिरं (८) यस्मिन्नष्टगुणा इमे स हि सखे मूर्खस्सुखं जीवति—" अतोऽहमपि न पठामि एकमपिपदं कस्मै न कथयिष्ये एवं दृढीकृत्य द्वादशादिनं यावन्मौनमेव विदधे। ततश्च भ्रान्तस्सन् शरीरं विहाय मानसरोवरे हंसोजातस्स एव तदनन्तरं त्वदीयगृहे तव पुत्रोऽभूत् । सत्वोपार्ज्जित कमणात्वस्यराजगृहे जन्म श्रीज्ञाननिन्दया च मूर्खत्वं प्राप्तं इति श्रुत्वा राजकुमारस्यापि तत्रोपविष्टस्य पूर्वजन्मजातिस्मरणमभूत् ततो तेन रोगशान्त्युपायः पूर्वजन्मकर्मप्रतीकारसाधनश्च पृष्टः । गुरुभिरुक्तं भो वरदत्त ! श्रूयताम् मम वाक्यं यत् सिद्धान्तसारं वर्तते "जइरोगा इय आयं, केउववास आंविला इयं जोई, कुणइ भाव सुद्धीप सो सवसमीहियं पावेई"—वरदत्तेनोक्तं भगवन् ! प्रत्या-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ख्यानकरणे तु मम शक्तिर्नास्ति अतः किमपि सुगमोपायं ब्रूहि यदहं कुर्वे'–गुरुणोक्तं
जउ जेइ कयजीवो पंचमी कत्तिमासे करेई वसमम्मि । पंचमि पग्गविहीणा
जावज्जीवं अणेग सुरकाणि ॥ सुरभोगा मणुयभोगाभुंजि वुणं रिद्धु विच्छारं ।
पाविकुणं सुरकं पावहिजवि अवीकं तउवर दत्तपञ्चमी गाहिया''–अतः हेराजकुमार ।
त्वया ज्ञानपञ्चमी कर्तव्या राजपुत्रस्तच्छ्रुत्वोवाच 'भगवन् ! भवदाज्ञया पंचमासाधिकवर्ष-
पञ्चकं यावत् पञ्चम्युपवासादिकं विधास्ये परन्तु कार्तिकपञ्चमी यावज्जीवमेकैव
वर्षमध्ये करिष्ये । इत्थं गुरुसमीपे प्रतिज्ञां कृत्वा पितरं प्रत्युवाच हेतात ! गुरुसम्मुखे
मया कार्तिकपञ्चमी गृहीता इत्युक्त्वा तं मुनिं प्रणम्य पित्रा सह स्वगृहमगमत्—
स श्रेष्ठी अपि सपरिवारः स्वगृहं प्रत्यगमत्—

अथ राजपुत्रः प्रजागणपरिवारितो पञ्चमीमहोत्सवकर्तुं समुद्यतोऽभूत् । सर्वा एव

पंचम्यः विधिना तेन कृताः कार्तिकशुक्लपंचमीदिने तु पर्य्युषणादि महोत्सवमुद्यापन-विधिना चक्रे ' ओंनमो नाणस्स ' इत्यष्टोत्तरशतसहस्रमितं जजाप च—ततःकियता कालेन वरदत्तस्य तत्पर्वप्रभावात् सर्वा एव रोगाः विलयं गताः रूपलावण्ययुक्तं च तच्छ-रीरमभूत् । ततोऽन्यदेशीयाणां नृपाणामेकसहस्रमिताः राजकन्यकास्तेनोद्वाहिताः

सा च श्रेष्ठिपुत्री गुणमञ्जरी अपि गृहमागत्य यथोक्तविधिना पञ्चमीव्रतमाराध-यति स्म· तेनाचिरेणैव कालेन रूपलावण्ययुक्ता जाता रुजश्च सर्वा एव तस्याः सद्यो विलयं गताः तस्याः पाणिग्रहणञ्च जिनचन्दननामा कश्चित् महाधनाढ्यो रूपयौवनसम्पन्नः जिनधर्मानुयायी श्रेष्ठिकुमार अकरोत् तौ च दम्पती यावज्जीवं सुखेन शरीरयात्रां निर्वाहयित्वा कालेन सुरलोकं प्रापतुः।

वरदत्त अपि धर्मेण चिरं राज्यं पालयित्वा मृतस्सन् पुष्पमालावतीविजये

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुंडरीकिण्यां नगर्यां अमरनामराज्ञः गुणवती नामभार्याया उदरे सूरसेन नाम्ना समुत्पन्नः स च द्वादशवर्षीय एव रूपलावण्यकलावान् समजानि तस्य पिता तमेव राज्ये स्थापयित्वामरलोकं गतः । स च राजपुत्रः एकोनशतराज-कन्यकाः परिणीतवान् । दशवर्षसहस्राणि यावद्राज्यं पालयित्वा श्रीसीमंधर-स्वामिनः सकाशात् दीक्षां प्रगृह्य पुत्राय राज्यं समर्प्य स्वयं प्रव्रज्यां गृहीत्वा एक सहस्रवर्षं यावत् चारित्रं संपालयित्वा केवलज्ञानं समुत्पाद्य मुक्तिं प्राप ।

अथ च श्रेष्ठिपुत्र्याः गुणमंजर्या जीवस्तु स्वर्गाच्च्युतो रमाप्रियविजयदेशे शुभायां नगर्यां अमरसिंहराज्ञो गृहे अमरवत्यां भार्यायां पुत्रत्वेन जातः तस्य सुग्रीव इति नाम पिता चक्रे । स च सुग्रीवः सम्प्राप्तयौवनः पूर्णे विंशतिमे वर्षे पित्रा दत्तं राज्यं प्रगृह्य पितर्य्युपरते धर्मेण पृथ्वीं पालयामास । तस्य सुग्रीवस्य चतुराशीतिसहस्राः




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुत्रा अभवन्। सुग्रीवस्तु चारित्रसाहितं केवलज्ञानं प्राप्य मुक्तिं गतः। इति कार्तिकशुक्लपंचमीविषये वरदत्तगुणमंजरीकथानकं समाप्तम्। इति सौभाग्य (ज्ञान) पंचमी व्याख्यानं सम्पूर्णं ॥

## अथ कार्तिक पूर्णिमा व्याख्यानं लिख्यते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्री सिद्धाचलतीर्थेशं, नत्वा श्रीऋषभं प्रभुं ॥
कार्तिकीपूर्णिमायाश्च व्याख्यानं वक्ष्यते मया ॥ १ ॥
सिद्धी विज्झाय चक्की नमिविनायिमुणिः पुंडरीको मुनिन्दो ॥
बालप्रद्युम्नशंबुः भरहसुकमणिः शैलदेशेत्तसिद्धाः ॥
रामो कोडीय पञ्च द्रविड ननवई नारदो पांडुपुत्ताः ।
मुत्ता एवं अणेगे विमलगिरिमहं तित्थमेयं नमामि ॥ २ ॥

व्याख्या । भो भव्याः! एतादृशं पापकर्ममलपरिहारकं श्रीविमलाचलतीर्थं (नमामि) यस्मिन् तीर्थोपरि विद्याधर चक्रवर्ती भरतस्तथा च नमि विनमि मुनि पुंडरीक मुनीन्द्र वाल प्रद्युम्न शंबु शुक राम पञ्चद्रविड नारद पांडुपुत्राद्याः नरवरा अनशनादिकं विधाय अष्टकर्मभिविनिर्मुक्तास्सन्तः परमपदं प्राप्ताः तमहं सिद्धशैलतीर्थं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनोवाक्कायभिर्नमामि । यस्मिंश्च कार्तिकपूर्णिमाया आगते शत्रुंजयगिरिसन्मुखदिशां गत्वा चैत्यवन्दनादिकरणेन महती धर्मबुद्धिर्भवति पुनश्च यस्मिन् कार्तिकपूर्णिमा दिने अनेके महात्मानस्तच्छैलेन्द्रशिखरारोहणेनैव परं पदं प्राप्ताः । तद्दृष्टान्तोयथा ।

अस्य जम्बूद्वीपस्य दक्षिणार्द्धखंडे इक्ष्वाकूणां भूमौ महात्मा नाभि नामा नृपोह्यभूत् । तस्य च मेरुदेवीनाम भार्य्या तस्या उदरकन्दरायां श्रीप्रथमजिनावतार ऋषभदेवो बभूव । स च पूर्वं वर्षषट्लक्षाणि यावत् कुमारपदे एव स्थितः परं तदनंतरं इन्द्रेणानीते सुनन्दासुमङ्गलानाम्न्यौ द्वे भार्य्ये समुद्वाहयत्—तयोश्च क्रमेण भरतबाहुबलाद्याः शतपुत्राः बभूवुः द्वे च कन्यके अभूताम् । अथ च तान् सर्वानेव सम्प्राप्तयौवनान् राज्यभारवहनसमर्थान् विज्ञाय स्वयं षष्टिलक्षवर्षाणि यावद्राज्यं पालयित्वा पुत्रेभ्यः स्वं राज्यं विभज्य भरतनामानं ज्येष्ठपुत्रं स्वसिंहासने समुपवेशयत्

For Private and Personal Use Only

अन्येभ्यश्च पृथक् पृथक् देशान् ददौ। येषां नामतो त एव देशाः विख्याता अभवन्। तेष्वेको द्रावडीति नामाप्यासीत् यस्य नाम्ना द्रविडदेशः प्रथितोऽभूत्। स च महात्मा ऋषभस्वामी दीक्षां गृहीत्वा अनेककोटिशिष्यवृन्दपरिवारितो देवैर्गीयमानमहिमो पृथिव्यां पर्यटन् कालेन केवलज्ञानं लब्ध्वा परमपदं प्राप।

अथ स द्रविडदेशाधिपो द्रावडः पित्रा दत्तं राज्यं बुभुजे तस्य च स्वनार्या सार्द्धं विषयसुखान्भुञ्जानस्य द्वौ पुत्रौ बभूवतुस्तयोश्च ज्येष्ठो द्रावडः लघिष्ठश्च वारखिल्ल इति. तौ द्वावेव सञ्जातयौवनौ विज्ञाय उद्वाहितौ। अथ च तावपि स्वस्वपत्नीभ्यां विषयसुखं बुभुजाते। तयोरपि पुत्रा उत्पन्नास्ते च कालेन चन्द्रकलावद्वर्द्धमानाः यौवनं प्राप्य ववृधिरे। अथ च ज्ञानिनाम्वरो भरतः भुक्तभोगान् भ्रातॄन् विज्ञाय स्वयमुत्पन्नवैराग्यस्तेषामवबोधाय दूतमाहूय प्राहिणोत्—स च दूतः

सर्वानेव राज्ञो निर्देशं श्रावयन् द्राविडसमीपमागत्य तमपि तस्य निदेशं श्रावयामास। स च द्राविडः ज्येष्ठभ्रातुर्निदेशमाकर्ण्य स्वयमपि प्रतिबुद्धस्सन् ज्येष्ठपुत्रमाहूय राज्यसिंहासनेऽस्थापयत् कनिष्ठाय वारखिल्लाय च एकलक्षग्रामान् पृथक् ददौ। स्वयञ्च संसारवासनां परित्यज्य दीक्षां गृहीत्वा यथेच्छं पर्यटन् श्री ऋषभदेवजिनपार्श्वे तपस्तप्त्वा कैवल्यं प्राप। अथ द्राविडः पित्रा दत्तं स्वराज्यं वारखिल्लश्च एकलक्षग्रामान् धर्मेण पालयामास। अथ गते कियति काले द्राविडो मनस्येवं व्यचिन्तयत्। अहो! पित्रा इदं साधु न कृतं यद्राज्यात् एकलक्षग्रामं पृथक् कृत्वा कनिष्ठपुत्राय वारखिल्लाय प्रदत्तमतो बलपूर्वकमहमेनं बहिर्निस्सार्य ग्रामान् गृहीष्यामि इति निश्चित्य स्वसैन्यमादाय भ्रात्रा सह युद्धार्थमगमत्। वारखिल्लोऽपि युद्धार्थमायातं स्वज्येष्ठभ्रातरमाकर्ण्य बहुलया सेनया परिवृतो युद्धार्थमाययौ। अथ तयो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वयोर्भ्रात्रोर्द्वादशवर्षाणि यावन्महद्युद्धमभूत् । तस्मिंश्च संग्रामे मनुजाश्वगजशरीरै-
र्भूमिर्व्याप्ता तेषां रुधिरेण च महती नदी प्रचालिता । एतस्मिन्नेव युद्धकाले एकदा
द्रावडो वनक्रीडार्थं नानाद्रुमलताकीर्णवनप्रदेशे विहरन् केषांचिन्महर्षीणामाश्रमं
जगाम तच्च नानापुष्पफलाकीर्णं पक्षिसंघविराजितंजलनिर्झरितसरोभिश्शोभितमाश्रमं
विलोक्य अश्वादुत्तीर्य्य तत्र गत्वा भक्त्या मुनीन् अभिवाद्य तेषां पार्श्वे तदनुज्ञातः
स्वोचितस्थाने तस्थौ । स च मुनिसंघ एतस्मिन् समये धर्मचर्चां कुरुते स्म, तत्र चैको
गुरुः सर्वेषां शृण्वतां संसारासारतां कथयाति । उक्तञ्च "गय कन्न चञ्चलाई
अमराचि ताइ राइ लच्छीए । जीवा सकम्म कलमतु भरिय भरातो पडंति
अहे," इत्यादि धर्मोपदेशं तेषां मुखाच्छ्रुत्वा संसारमसारं ज्ञात्वा क्षणमात्रेणैव
समुत्पन्नज्ञानः राज्याशां क्रोधञ्च परित्यज्य मनस्येवमचिन्तयत् । अहो ? मम जीवनं





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धिक् यतो एक एव मम भ्राता तेन सहाहं युद्धं करोमि. युध्यमानस्य च द्वादशवर्षाणि गतानि । राज्यलोभादेवेदं क्षणभंगुरशरीरं प्राप्य इदृग्विधमनिष्टं मया क्रियते एवं विचार्य्य तापसाश्रमादुत्थाय तूर्णमश्वमारुह्यापराधक्षमापनार्थं स्वभ्रातुस्तमीपमागच्छति स्म । अथ च वारखिलोऽपि शुद्धभावेन ज्येष्ठभ्रातरमागतं विलोक्य झटिति तच्चरणावगृहीता स च द्रवडो बाष्पपूर्णनयनः स्नेहार्द्रहृदयस्तमुत्थाप्य उवाच हे भ्रातः ! इदं सर्वमेव राज्यं त्वमेव गृहाण यतोऽहं परित्यज्येमं संसारं दीक्षां गृहीष्ये । इति श्रुत्वा वारखिलं, प्रत्युवाच । एवञ्चेदहमपि राज्यं न गृहीष्यामि एवं तौ द्वावेव परस्परं सम्भाष्य सर्वं राज्यमपत्येभ्यो विभज्यार्द्धमर्द्धं दत्वा जातवैराग्यौ तौ भ्रातरौ पञ्चकोटि क्षत्रियपरिवृतौ तेषामेवतापषाणामाश्रमं गत्वा तेभ्यो दीक्षां प्रगृह्य तपश्चर्यां चक्रतुः । अथ च तौ वल्कलचीरधारिणौ कन्दमूलफलाहारिणौ त-

For Private and Personal Use Only

यसा कृशशरीरौ जातौ । ततः कियता कालेन केचित्साधवस्तीर्थयात्रां कुर्वन्तो तेन मार्गेण गच्छन्तस्तस्मिन्नेव वने समायाताः तावपि तान् महात्मनस्समागतान् विलोक्य बहुमानपुरस्सरं नमस्कृत्य कन्दमूलादिभिस्सत्कारादिकं चक्रतुः । अथ तेऽपि साधवो गमनागमनसमयं विचार्य तत्रैवैकस्य महतस्तरोर्मूले भूमिं प्रमार्ज्य आसनानि स्थापयामासुः । द्रवडवारिखिल्लावपि तेषां सेवां कुर्वन्तौ तत्रैव तेषां सम्मुख उपविष्टौ ततस्तस्मिन्नेवावसरे तरुशाखात एकश्चटकः मुखाग्रेऽकस्मात् पतित अथ तेष्वेको मुनिर्विगतायुषं तं चटकं विज्ञाय झटित्युत्थापयित्वा तस्य कर्णे नवनकारमन्त्रमश्रावयत्. विमलगिरेश्चापि महिमा कथिता ततः स चटकः सद्य एवनष्टकिल्विषो जातवैराग्यो भूत्वा क्षणात् तद्धर्मोपदेशधारणया चटकशरीरं विहाय मुहुर्तान्तरेणदिव्यं देवशरीरं लब्ध्वा तत्रागत्य मुनेः पादावभिवन्द्य तेनाज्ञप्तस्तच्छन्मुख एवोपविशत् । द्रवड-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाराखिलौ तु इत्यद्भुतां लीलां दृष्ट्वा जातविस्मयौ तं महद्दिव्यरूपधारिणं देवं विलोक्य बद्धाञ्जली तान् मुनीनपृच्छतां । भगवन्नेषातीवकान्तिधारको रूपवान् को नाम देवोस्ति? मुनिभिरुक्तमेष स एव चटकोस्ति योऽत्रैव मृतः परं नवनकारमन्त्रधारणात् विमलगिरिमहात्म्यश्रवणाच्चैनमीदृग्विधं देवशरीरं प्राप्तं एतन्निशम्य तौ पुनरूचतुः। हे स्वामिन् ! स विमलगिरिः कीदृशोस्ति किञ्च तन्महात्म्यमित्यावयोरुपरि कृपां कृत्वा कथयन्तु भवन्तः। ततस्तेष्वेको मुनिराह।

अस्य जम्बूद्वीपस्य दक्षिणार्द्धभरतक्षेत्रे श्रीशत्रुञ्जयनामा गिरिरष्टोत्तरशतनामभिरलंकृतस्तीर्थराजोस्ति तस्य च शत्रुञ्जय (१) पुंडरीक (२) सिद्धगिरि (३) विमल गिरि (४) सुरगिरि (५) रित्याद्या एकविंशतिस्तु लोकप्रसिद्धनामानः सन्ति एतस्मिन्नेव गिरावनेके सिद्धास्तपांसि कृत्वा परमपदं याताः अत्रैवानन्तनामा मुनिरनन्तका-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लोपेक्षया स्तोकेनैव कालेनानन्तपदं प्राप। अत्रैवचाजिनप्रथमगणधरकादमागिरिनामानश्चतु- र्विंशतिमहात्मानो मुक्तिं प्राप्ताः। इहैव वर्तमानकाले प्रथमजिनस्य प्रथमगणधरपुण्ड- रीकश्चैत्रशुक्लपूर्णिमायां पञ्चकोटिभिर्मुनिभिस्सह स्वर्गतिं गतस्तेनैव पुण्डरीकगिरिरित्ययं कथ्यते। पुनश्च कोटिद्वयमुनिपरिवारेण परिवृतो फाल्गुनशुक्लदशम्यां नमिर्विनमी च विद्याधरराजर्षिरस्मिन् श्रीसिद्धशैले शिवपुरिं प्रतिगतः। तयोश्च चतुःषष्टिसंख्याकाः राजपुत्र्यः चैत्रशुक्लदशम्यामस्मिन् विमलगिरौ अनशनेन देहं परित्यज्य शिवपुरं याताः। तेनायं गिरिः शिवपुरनगरारोहणे सोपानसदृशो वाच्यः। पापमलापहारणे च नीरव दिमं ज्ञेयम्। तेनैव विमलगिरिः कथ्यते। पापारिगञ्जने चायं सूरवदस्ति। तेनैवायं शत्रुञ्जय इति कथ्यते। अत एव मनुष्यदेहं प्राप्य येनास्मिन् शत्रुञ्जयतीर्थे गत्वा आदिजि- नस्य भक्तिपूर्वकमर्चनादिकं न कृतं स तु नररूपेण पशुरेवास्ति। तस्य एव मानुषं जन्म



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सफलमस्ति यश्च तीर्थबुद्ध्या तत्र गत्वा आदिजिनमर्च्चयति नमस्करोति च । तेनैव महात्मना कैवल्यसुखं स्तोकेनैव कालेन प्राप्यते ।

इति गुरुमुखादस्य सिद्धगिरेर्महती महिमां श्रुत्वा तौ द्राविडवारखिल्लौ पञ्चकोटि-मुनिपरिवारपरिवृतौ तापसगुरोराज्ञां गृहीत्वा सिद्धशैलपर्वतवन्दनार्थं श्रीशत्रुञ्जयं प्रतिजग्मतुः । अथ च ते महात्मान अपि इतश्चासनान्युत्थाप्यान्यत्र जग्मुः । तौ च द्राविड-वारखिल्लौ सपरिवारौ श्रीशत्रुञ्जयारोहणसमये एतादृशमवग्रहं जग्रहतुः "यदावयोः कर्मक्षयं भविष्यति तदैवाहारं गृहीष्यावहे । " एवं तौ द्वावेव भ्रातरावग्रहमङ्गीकृत्यास्मिन् शैलराजे चतुरो मासान् अतिवाहयामासतुः । अथ चैवं नियमानुसारतः कुर्वतोस्तपसा जिनप्रभुमाराधयतोर्ध्यानयोगेन कर्मराशिं दूरीकुर्वतोस्तयोः चातुर्मासस्यान्तिमे दिने कार्तिकशुक्लपौर्णमास्यां चतुः कषायरोधनेन मोहक्षीणप्रभावात् त्रयोदशगुणस्थानारो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







हणेन चतुः कर्मराशिः क्षयं जाता । ततः सद्य एव केवलज्ञानदो भगवान् जिनः प्रादुर्भूय तौ स्वं लोकं दर्शयामास । तेन तौ द्राविड़वारखिल्लराजर्षी दिक्कोटि-मुनिपरिवारपरिवृतौ अचलय्याक्षगातिविभूषितं मुक्तिपदं प्रापतुः ।

तेन कार्तिकशुक्लपूर्णिमा अतीवोत्तमा वर्तते तस्मादस्मिन् दिने श्रीशत्रुञ्जयस-म्मुखे गत्वा महताडम्बरेण श्रीजिनबिम्बंरथे, आरोप्य पूजास्नानमहोत्सवादिकं विधेयं । तेन सकल दुष्कर्मराशिः क्षयं याति । महती च पुण्यवृद्धिर्भवाति. । अथ च पूर्वदिने पोषधादि करणान्महत्फलं भवति ।

त्रिमुनिचाष्टभूवर्षे ( १८७३ ) दुर्गे जयशलाभिधे ।
गणिना जयसारेण व्यलेखि शिष्यहेतवे ॥

इति कार्तिकशुक्लपूर्णिमाव्याख्यानं ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## अथ मौन एकादशी व्याख्यानं लिख्यते ।

तत्रैकदा श्रीजिनं नत्वा गौतम अपृच्छत् 'भगवन्! मार्गशीर्षशुक्लैकादश्याः करणे किंफलं भवति ततो वीरः प्राह हे गौतम! शृणु यथा श्रीनेमिना कृष्णाग्रे प्रोक्तं तदेव कथयिष्ये ।

एकदा द्वारावत्यां पुर्यां श्रीनेमिनामा प्रभुः निवसति स्म । तस्य वन्दनार्थं श्रीकृष्णस्समागत्य भक्त्या तं प्रणम्याह भगवन्! षष्ठ्यधिकशतत्रयदिनमध्ये तद्दिन-मादिश्यताम् यस्मिन् दिने कृतं पुण्यं बहुफलमनन्तञ्च भवति । इत्याकर्ण्य नेमिना प्रोक्तं हे कृष्ण! मार्गशीर्षशुक्लैकादशीदिने कृतं पुण्यं बहुफलं भवति तस्मिन् दिने पंचशततीर्थंकराणां कल्याणकानि जातानि । अत्रैव पञ्चाशदतीत चतुर्विंशति सत्कानि पञ्चाशदनागतचतुर्विंशति सत्कानि पञ्चाशच्च वर्तमानचतुर्विंशति सत्कान्य-

For Private and Personal Use Only

भवन् एवं तानि सार्द्धं शतैकमितानि कल्याणकानि तेनैषैकादशी सर्वोत्तमा वर्तते । इति श्रुत्वा कृष्णेन पृष्टं 'भगवनस्यामेकादश्यां किं कर्तव्यमस्ति ? नेमिनोक्तम् 'अहोरात्रं पोषधं ग्राह्यं' चतुर्विधाहारोपवासश्च कार्यः मौनञ्च धार्य्यम् तत्र भणनं गुणनं विना नान्यत्किमपि वक्तव्यम् पारणदिने च गुरुसमीपे गत्वा तमभ्यर्च्य जिनगृहे देवान् सम्पूज्य गुरुणाज्ञप्तो भोजनंकुर्यादेवं द्वादशवर्षाणि यावत्कार्य्यं । तपसि पूर्णे चास्या उद्यापनं कर्तव्यं । कृष्णोवाच । भगवन् ! पुरापि केनास्या एकादश्यास्तपः कृतं ? श्रीनेमिनाथः कथयति । सुव्रतनामा श्रेष्ठी अस्या मार्गशीर्षशुक्लैकादस्याः व्रतप्रभावात् शिवपदं प्राप । कृष्णोनोक्तं 'तत्कथं ! ' श्रीनेमिनाथः कथयति-

धातकीखंडनाम्नो द्वीपस्य दक्षिणभरतोर्द्धे विजयपुरं नामनगरमभवत् । तत्र वर्मो नामराजा न्यायवान् प्रजापालकश्चासीत् । तस्य चन्द्रवतीनाम भार्या शीलादिगुणसम्पन्ना



For Private and Personal Use Only

तस्मिन्पुरे सूरनामा श्रेष्ठी वसति स्म। स च श्रेष्ठिप्रवर ऋद्धिमान् जिनभक्तो गुरु-सेवातत्परः षड्विधावश्यककारी चैत्यादि गुणवान् आसीत् । एकदा सूरः गुरुसमीप-मागत्य भक्त्या तं प्रणम्योवाच भगवन्! ईदृग्विधं धर्मं कथय येन कर्मक्षयःस्या त्तदा तस्मै गुरुभिरेकादशी तपः करणमादिष्टम् । अथ स गुर्वाज्ञया गृहमागत्य सकुटुम्बः द्वादशवर्षाणि यावत् मर्गशीर्गशुक्लैकादशीव्रतरूपं तपश्चकार समाप्ते च द्वादशमे वर्षे तेन विधिपूर्वकमस्या उद्यापनमपि कृतं अथ च तत्पुण्यप्रभावात् कालेन शरीरं विहाय स्वर्गसुखमनुभूय एकादशमे आरणकल्पे प्राप्ते एकविंशति सागरपरिमितायुः पालयित्वा ततश्च्युतो जम्बूद्वीपान्तर्गतभरतक्षेत्रस्य सोरिनाम्नि नगरे समुद्रदत्तस्य श्रेष्ठिनः प्रीतिमती भार्याया उदरे पुत्रत्वेनोत्पन्नः। सच सार्द्ध सप्तादिनाधिक मासनवगते अर्द्धरात्रौ जातस्तस्य नालस्थापनार्थं श्रेष्ठी यदा गर्तं खनितुमारब्ध-

स्तदा गर्तखननसमये निधिर्निर्गतस्ततो जाताल्हादः श्रेष्ठी तेन द्रव्येण महाजन्मोत्सवं कृतवान् । अथजन्मतो द्वादशेऽहनि कुटुम्बभोजनतः पूर्वं मातुः व्रतपालनेन तस्य सुव्रत इति नाम चकार । अथ च स श्रेष्ठिकुमारस्तदनन्तरं शुक्लचन्द्र इवानुदिनमेधमानः पित्रा शिक्षित सर्वगुणो यौवनं प्राप्तः । तदा महर्द्धिकव्यवहारिणां श्रेष्ठीनां एकादश कन्यका स्तं परिणाप्य गार्हस्थ्यभारं तस्मिन् समारोप्य स श्रेष्ठी प्रव्रज्यां गृहीत्वा धर्मेणानशनं विधाय मृतः स्वर्गतिञ्च प्राप । अथ गृहस्वामी सुव्रतः श्रेष्ठी दशकोटिधनवैभवाद्राज्ये प्रजायांचातीव मान्यो बभूव । ततश्चैकदा तद्ग्रामसमीपवर्तिनि वने विहरन्तः शीलसुन्दराचार्याश्चत्वारो ज्ञानिनस्तत्र समायाताः । तेषामागमनन्तु वनपालमुखादाकर्ण्य स श्रेष्ठिप्रवरः राजानं समाहूय सकुटुम्बः राजपुरुषैः परिवारितश्च तेषां दर्शनार्थं गतः । तत्र च मुनीनभिवाद्य सर्व एव नृपादयस्तैरनुज्ञाताः यथायोग्यासनेषूपविष्टास्तेषां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुनीनां मुखाद्धर्मकथाः शुश्रुवुः ! तत्र च ते तन्मध्ये मार्गशीर्षशुक्लैकादश्या अपि महिमां वर्णयामासुः । अथ च अकस्मादेव तच्छ्रवणात् तस्य श्रेष्ठिनःपूर्वजन्मस्मरणं समुत्पन्नं तेन मूर्च्छितः सन भुवि पपात । ततो मुहूर्तमात्रेण संज्ञां लब्ध्वा तेनेत्थं विचारितमहो ! मया पूर्वस्मिन् भवे मार्गशीर्षशुक्लैकादशीमाराध्य आरणदेवो जातस्ततश्चाद्य सुव्रतनामा श्रेष्ठिह्यभवं अतोद्यम या किमनुष्ठेयामिति विचार्य तेषांमहात्मनामग्रे उक्तं 'भगवन् ! किमपि कर्त्तव्यमादिशतः' गुरुभिरुक्तं पूर्वभवे कृतैकादशी एव करणीया" इत्याकर्ण्य तथेत्युक्त्वा तान् प्रणम्य सर्वे नृपादयः स्वगृहान् जग्मुः । अथ च श्रेष्ठी सकुटुम्बस्तदाराधनाय प्रवृतः । एकदा मौनव्रतधारिणं पौषमाचरन्तं सकुटुम्बं श्रेष्ठिनं तपसि स्थितं लोकमुखाद्विज्ञाय चौराश्चौर्यर्थं तस्य गृहे प्रविष्टाः ।

अथ च अन्धकारावृतायां रात्रौ ते चौराः श्रेष्ठिन आभरणद्रव्यादीनादाय यदा बहिर्ग-

For Private and Personal Use Only

न्तुमुद्यतास्तदा तत्काल एव कस्याश्चिद्देवतायाः शासनेन ते सर्वे पदमपि उत्थाप-यितुमशक्ताश्चित्रालिखिता इव निश्चला बभूवुः परं न तस्य श्रेष्ठिनः महाप्रभोर्व्रत-प्रभावात् किञ्चिदपि हानिर्जाता। ततः प्रभाते स श्रेष्ठिप्रवर उत्थाय देवालयं गत्वा गुरू-णामग्रे पौषधं पारयित्वा देवानभ्यर्च्य यदा गृहमागतस्तदा तान् चौरान् चित्रार्पितार-म्भान् केनापि देवेन प्रतिरुद्धान् निश्चलान् विलोक्य परं विस्मयं प्राप। लोका अपि इत्याश्चर्यकारिणींघटनामाकर्ण्य विलोकनार्थमागताः। अथ च राजा तस्य गृहे सन्निविष्टान् चौरानाकर्ण्य तेषां संरोधनाय राजपुरुषान् प्रेषयामास ते च तत्रागत्य एतेषां स्तम्भनरूपमदहाश्चर्यं दृष्ट्वा झटिति राज्ञे निवेदयामासुः। राजा च सपरिवार स्तत्रागत्य एतादृशं देवप्रभावं दृष्ट्वा श्रेष्ठिनं वस्त्राभरणादिभिस्सत्कृत्य सम्मानयामास अथ च राजसहितेषु सर्वेषु जनेषु समागतेषु देवताप्रसादात् ते सर्वे एव चौरा मु-



For Private and Personal Use Only

क्वंधना बभूवुः । तान् दृष्ट्वा तेषामभयदानार्थं श्रेष्ठिना प्रार्थितो नृपातरभयम-दात् पृष्टश्च रात्रौ कथ मिमे न मुक्ताः ? श्रेष्ठिनोक्तं भगवन् ! मामकीनस्य तपस्य भंग विचारत एव देवतया इमे रात्रौ स्तंभिता इदानीन्तु भवतामग्रे मोचिता इति प्रतिभाति । राजा तदाकर्ण्यातीव प्रसन्नचेताः सन् जिनधर्मं प्रशंस्य तं श्रेष्ठिनं बव्हमानयत् । ततः सर्व एव जनाः स्वं स्वं गृहं जग्मुः । राजा च तान् चौरान् श्रेष्ठिने मर्प्या जगाम । अथ च श्रेष्ठी लज्जया नतकंधरान् वेपमानान् तान् चौरान् विज्ञाय कृपापूर्णमानस अभयं दत्वोवाच हेचौराः ! गृहं यातः परं इतश्चौर्यं न विधेयं ते च तदाकर्ण्य तं प्रणम्य तत्कोमलस्वभावं प्रशंसन्तः स्वगृहाणि ययुः ।

अथैकदा एकादशीदिने गृहास्थितेनानेन श्रेष्ठिना पौषधो गृहीत अतः स स-परिवारो मौनमवलम्ब्य जिनध्यानतत्परस्सन तस्थौ । एतास्मिन्नेव काले दैवयोगा

स्मिन्नगरे महान्ज्वालावलीपरिवृतस्सकललोकभयंकर अग्निरुदितस्तेन सर्व एव ग्रामो दाहितः परन्तु श्रेष्ठिनो गृहं तस्य हट्टा अन्यानि च स्थानानि येषु तस्य किमपि वस्तु ह्यासीत् तदेव न दग्धं ।

पोषधशाला देवग्रहं चावशिष्टमन्यत् सर्वमेवनगरं वन्हिना भस्मावशेषं कृतः। अथ प्रभाते नगरनिवासिनः सर्वं निरवशेषमेव नगरं देवायत न श्रेष्ठिगृहवर्ज्यं दग्धं विलोक्य जातविस्मयाः श्रेष्ठिनः पुण्यप्रभावामिमं मेनिरे । राजाचेममाश्चर्यं श्रुत्वा श्रेष्ठिनः गृहमागत्य बहुमानपुरस्सरं तमपूजयत् । जिनधर्मस्य च महती प्रशंसा जाता । यतस्तथ्यमेव धर्मादेवना आयुर्यशो बलं च लभन्ते । धर्मेणैव विद्या सम्पत्ति कीर्तयश्च लभ्यन्ते धर्मप्रभावत उत्तमकुले जन्म रूपलावण्यादयश्च भवान्ति

अथ स श्रेष्ठी व्यतीते बहुतिथे काले एकादश्याउद्यापनमपि कार्यमिति निश्चित्य



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वाणि . वस्तून्येकीकृत्य विधिना उद्यापनमकरोत् । तत्रैव संघपूजादिकमपि कृतं परञ्च यथावत् सत्यं पालितं यतश्चोक्तं "सत्येन धार्यते पृथ्वी सत्येन तपते रविः । सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्" ततः स स्वशरीरं वृद्धावस्थायांगतं विलोक्य एकदा मनस्येवमचिन्तयत् 'अहो! मया यावज्जन्म श्रावकं धर्मं पालितं मौनादिना एकादशी आतिकृता तदुद्यापनेनापि जन्मनः साफल्यं कृतं परं प्रव्रज्या न गृहीता यतः संसारमियमसारं वर्तते अद्य वर्षशतान्ते वा निश्चयमस्य त्यागस्तु भविष्यत्येव अत इदानीमेव किमिति न त्यज्यते ? यदि कस्यचिद्गुरोर्लाभः स्यात् तर्हि अवश्यमेव दीक्षां गृह्णीयां । इति मनोरथं कुर्वतस्तद्ग्रामेऽकस्मादेव गुणसुन्दरसूरिकाद्याश्चत्वारो महात्मानस्तरणतारणसमर्थाः क्षमाश्रयाः समागताः । तद्वन्दनार्थं सर्व एव नगरनिवासिनो गताः यथा श्रीपाक्षिक सूत्रे " इम स्सधम्मस्स केवली पन्नतस्स' इति फलमुक्तत्वात् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः सुवृतश्रावक अपि संसारभयात् 'बिआलित्तेणभंते पलित्तेणं भंते लोए' इत्याद्युक्त्वा अहो क्षणमात्रमप्यत्र न स्थातव्यं यतो गुरुभिरप्यहं पूर्वं प्रतिबोधितः अतस्तेषां समीपे गत्वा दीक्षां गृहीष्ये इति निश्चित्य गृहव्यापारभारं पुत्रेष्वारोप्य सत्वरं सप्तक्षेत्र्यां निजवित्तं व्ययीकृत्वा गुरूणां समीपमागत्य तेभ्यो दीक्षां प्रगृह्य प्रव्रजाति स्म ताश्चैकादशपत्न्य अपि शीघ्रमेव तपोविशेषकार्यविरता गृहं विहाय पतिमेवान्वगच्छन् ।

अथैकदा प्रव्रज्यां प्रगृह्यैकादश्यां मौनमास्थाय तपः कुर्वति सुव्रते तत्परीक्षां कर्तुमिच्छुर्मिथ्यादृग्देवसुव्रतनामा कश्चिन्मुनिः कस्यचित् साधोः कर्णयोर्महतीं वेदनामकारयत् । तस्य वेदना कृतेऽपिमहत्युपचारे न शाम्यति तदा देवसुव्रतेन साधूनां पुरत उक्तं अस्य मुनेः कर्णवेदना सुव्रतऋषेर्भेषजात्क्षयं यास्यति यदि स एवाश्रमाद्बहिरागत्योपचारं करिष्यति तदैतत्वेदनाक्षयः स्यात् । तच्छ्रुत्वा ते साधवस्तत्रागत्यास्यो-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पचारार्थं सुव्रतमभ्यर्थयन् सुव्रतश्च तदाकर्ण्य व्रतभंगभयादासनादुत्थानमसहमानस्तत्र स्थित एव तेषां महानाग्रहं विज्ञाय "ओंनमो अरिहन्ताण" मितिमन्त्रमुच्चारितवान्। ततस्तत्प्रभावात् स वेदनार्हितस्साधुरारोग्यं प्राप। इति तत्प्रभावांविलोक्य देवव्रतो लज्जितस्सन् तस्य चरणावगृहीत्। सर्वं एव साधवस्तस्यकर्म प्रशशंसुः। इति बहुश एव महात्मनः सुव्रतस्य एकादश्याराधनप्रभावः।

अथ च स सुव्रत एवं तप आराध्य कालेन देहमिमं विहाय केवलज्ञानं लब्ध्वा मोक्षं प्राप। ते गौतमादयो महर्षय इति वीरेणोक्तां सुव्रतऋषिकथां श्रुत्वा कृष्णशुक्लैकादशिनामाराधने गौतमाद्यस्सर्वे एव उद्यतास्समभवन् इति मार्गशीर्षशुक्लैकादशी कथानकं समाप्तम्। —

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथ पाषदशमाऽयाख्यानं लिख्यते ।

अभिनव मंगलमालाकरणं हरणं दुरन्तदुरितस्य ॥
श्री पार्श्वनाथचरणं प्रतिपन्नो भावतः शरणम् ॥ १ ॥

अहं श्री पार्श्वनाथचरणं प्रतिपन्नः आश्रितः किंभूतं-शरणं रक्षकं पुनः किं० अभिनवानां मङ्गलानां माला अभिनवमङ्गलमाला तस्याः करणं कारकं । पुनः किं० दुरंतदुरितस्य हरणं ॥ १ ॥ यतः श्री पार्श्वनाथस्मरणेनैव सकलमनोवांच्छितार्थाः सिद्ध्यन्ति । तथा चोक्तं 'तइ सम्मरं हत विघ्धं दत्तपुत्तकलत्ताहिं' इत्यादि येषां श्री पार्श्वनाथानां पादस्पर्शनतो गंगानद्यपि पवित्रा जाता तत्कथा श्री हरिवंशपुराणोक्ता भक्तानां कौतुकाय लिख्यते ।

एकास्मिन्समये गंगादेवी इन्द्रसभायां गता परमिन्द्रेण तस्याः सन्मानादिकं न कृतं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्तव्यः मया युवयोर्बलं सम्यक् दृष्टं न हि तत्र भवतां बल एव हेतुर्भवन्तस्तु कारण भूता एव किन्तु अयं सुदर्शनचक्र एव सर्वानशातयत्। एतासामष्टादशाक्षोहिणीनां हनन रूपः पातकस्तु मत्पादयोरेव वर्तते अत एव मया तस्यप्रक्षालनार्थं गंगा निस्सारिता सैव पापप्रक्षालनं करिष्यति। इत्याकर्ण्य गंगा पुनरब्रवीत् 'एवं चेत्तर्हि अहन्तु ईश्वरस्य शिरसि तिष्ठामि अतः मदीयं पापमीश्वरस्य मस्तके पतति--'--इन्द्रेणोक्तं 'भगवति! इत्यपि तव भ्रम एव यतो ईश्वरेण ब्रह्मणः पञ्चमाशिरस्त्रिशूलेन छिन्नमतस्तत्पातकपरिहाराय स तु त्वां शिरसि धत्ते ततो गंगा प्राह। एवमस्तु परं मम यात्रायां कोऽपि परदारपरद्रव्यपरद्रोहपराङ्मुखो महात्मा पुरुषस्समायास्यति तच्चरणरजसैवाहं पवित्रीभविष्यामि अर्थात् स एव मां पावयिष्यति। इन्द्रेणोक्तं 'एवंविधस्तु महात्मा स्वर्गे पातालेपि च नास्ति तर्हि मनुष्यलोकस्य का कथा इति श्रुत्वा कुपिता गंगा एता-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो विलक्षीभूय गंगा यावद्वलते तावदिन्द्र समुपतस्थौ उक्तं च "आयाहि भगवति गंगे ! शाधि च किं कार्यमस्ति भवत्याः' गंगयोक्तं भो इन्द्र ! त्वं साम्राज्यमदेनोन्मत्तोसि अस्मासु तव किं प्रयोजनं ? यतः प्रत्युत्थानादिकमपि न करोषि--इन्द्रेणोक्तं 'भगवति ! क्षमस्वेदानीं मया भवत्या एव चिन्ता क्रियते--गंगयोक्तं 'का सा चिन्ता ?' इन्द्रः कथयति । मर्त्यलोकवासिनो नराः स्त्रीहत्यादीन् महापापानपि विधाय त्वयि स्नात्वा तानि सर्वाणि तुभ्यं समर्प्य प्रतियान्ति त्वं तु तान् पापान् कुत्र क्षिपासि? इति श्रुत्वा गंगोवाच ।

मया सर्वानि पापानि विष्णोः पादयोः प्रक्षिप्यन्ते । यतः 'विष्णुपादोदकी गङ्गेति' स्मृत्यन्तरे उक्तं । तेषां पापानाञ्च परमेश्वरपादस्पर्शनान्मुक्तिर्भवति--इति श्रुत्वेन्द्रः प्राह "गंगे मैवं ब्रूहि तवेदं वाक्यन्तु भ्रान्तिमूलकमेव यतो कौरव पांडवानां युद्धे यदा पांडवाः स्वबलमप्रशंसन् तदा कृष्णेनोक्तं भवाद्भिरहंकारो न



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृग्विधस्य महात्मनो दर्शनार्थं सहस्रशो नेत्राणि कृत्वा कमपि महान्तमन्वेषयत् । एवं कियता कालेन वाराणस्यां पार्श्वकुमारो दृष्टः तद्दर्शनादेव जाताल्हादा वाराणस्यामागत्य पञ्चक्रोशं यावत्तत् पार्श्वे स्थितवती । तेन सा स्वयमतीव पवित्रा भूत्वा त्रिभुवनपावनसमर्था बभूव । पार्श्वनाथचरणप्रक्षालनतस्तस्यास्सर्वमेव पापं विलयं गतं । अतएव वाराणसीपार्श्वे पञ्चक्रोशं यावत् गंगायां स्नानेन पापं प्रणश्यति । एतादृशाणि बहूनि श्रीपार्श्वनाथप्रतिमाचमत्काराणि दृश्यन्ते । अद्याप्यष्टोत्तरशत प्रमाणानि श्रीपार्श्वनाथस्वरूपाणि भव्यजननमस्कृतानि सकलापद हन्तृणि अन्तरिक्षे विहरन्ति । अत एव सपादलक्षदेशान्तर्गत श्रीफलवर्द्धिकाग्रामे बहुद्रव्यव्ययपूर्वको महीयान् समर्चनः अस्मिन् दिवसे श्रीचतुर्विधसंघमिलनेन श्रावकगणेन क्रियते अस्मिन्विषये कथानकं लिख्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीविक्रमादित्यराज्याद्वेदसप्तरुद्र ( ११७४ ) प्रमिते वत्सरे श्रीदेवसूरि नामानः महात्मानो जाताः ते च श्रीअर्बुदाचलसमीपे टेलीग्रामसीम्नि लुंकडीय नाम वटवृक्षस्याधोभागे श्रीउद्योतनसूरिभिः प्रशस्तमुहूर्तवेलायां सर्वदेवादीन् अष्टौ शिष्यान् शिक्षयित्वा सूरिपदे स्थापितवान् । येन च चतुराशीति वादिनां पतिः कुमुदचन्द्रोऽरिजितः । ते चेमे चतुराशीति वादिनः । वंभ अट्ठनव ( १७ ) बुद्ध नग ( १८ ) अट्ठारह जित्तीय । सैव सोल ( १६ ) दह ( १० ) भट्ट सत ( ७ ) गंधब्बवि जितीय-॥ १ ॥ जित्त दिगम्बर सत्त ( ७ ) पुण खत्तिय ( ४ ) चार दु ( २ ) झोई । इक ( १ ) धीवर ( १ ) इक भिल्ल अरु भूमिपाड ( १ ) इकभोई ॥ २ ॥-"- इत्येषां योगेन चतुराशीति भवन्ति ।

अथैकदा श्रीदेवसूरयश्चातुर्मासतपश्चर्यार्थं श्रीमेडतानाम्नि नगरे स्थिताः । त-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रस्थाः श्रावकास्सर्वे वक्ष्यमाणविधिना धर्ममाचरन्तस्तिष्ठन्ति स्म । तच्च । व्याख्यानश्रवणं जिनौकसि गतिर्नित्यं गुरोर्वन्दनं । प्रत्याख्यानविधानमागमगिरां चित्ते चिरं स्थापनं ॥ कल्याणोदितमात्मशक्तितपसा सम्वत्सराराधनं । श्रद्धा जन्मफलं सदेतिजगृहुः श्रीसूरिपादान्तिके ॥ एवं चातुर्मासमतिवाह्य ते महात्मानः फलवर्द्धिपुरे मासकल्पकरणाय गताः । तत्र चैको निःस्वः पारस नामा श्रावकः प्रतिदिनं धर्ममेवाचरन् तिष्ठति परं तस्मिन् सर्व एव श्रावकगुणा आसन् । श्रावकगुणास्तूक्ताः । योगशास्त्रे तदित्थम् । न्यायसम्पन्न विभवः शिष्टाचारप्रशंसकः । कुलशीलसमैस्सार्द्ध कृतोद्वाहोऽन्यगोत्रजैः ॥ १ ॥ पापभीरुः प्रसिद्धश्च देशाचारं समाचरन् । अवर्णवादी न क्वापि राजादिषु विशेषतः ॥ २ ॥ सदा कुलोचितं कुर्वन् व्ययं वित्तानुसारतः । अष्टविधगुणैर्युक्तं शृण्वानो धर्ममन्वहं ॥ ३ ॥ बहुदर्शी विशेषज्ञः कृतज्ञो लोकवल्लभः ॥ सलज्जः सबलः सौम्यः परोपकृतिकर्मकृत् ॥ ४ ॥ इति—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथैकदा स पारसश्रावको बहिर्भूमिं गतस्तत्रैकं पाषाणमम्लानपुष्पमण्डितं तत्रत्यां भूमिञ्च सचिक्कणां विलोक्य चकितमनाः स्वगृहमागत्य चिंतयति स्म। अस्मिन्नेवावसरे तस्यैका गौर्गोपालेन वने नीयमाना सायान्हे गृहं प्रत्यागतवती दुग्धदोहाऽऽसीद् तां निर्दुग्धां विलोक्य गोपालमाहूय तस्यैव चौर्यं विज्ञाय तमताडयत् तदा गोपालेनोक्तं स्वामिन् नह्यत्र ममापराधमास्ति यत इयं धेनुः स्वयमेव वने दुग्धं प्रस्रवति मद्वचनमिदं मिथ्यैव जानासि चेन्मया सह तत्र गत्वा दर्शयतु भवान्। इत्याकर्ण्य सः श्रावकस्तदनु वने-ऽगच्छत् ततो द्वावेव तौ तस्याः मार्गे गत्वा स्वयं तत्रैकस्मिन् प्रदेशे दुग्धं प्रस्रवंतीं गां विलोक्य जातविस्मयौ गृहमगमताम्।

स च श्रावकः प्रभाते गुरूणां समीपे गत्वा तत्कारणमपृच्छत् गुरुश्च । ध्यानेनैतद्विलोक्य तत्रार्हतीं काचन प्रतिमां ज्ञात्वा तेन सह तस्मिन् वनप्रदेशे समागत्य तां



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूमिमुत्खातयामास । ततो गर्तादेका स्वकान्त्या तद्देशं द्योतयन्ती महती श्रीपार्श्वनाथ देवस्य प्रतिमा निःसृता तां महताडम्बरेण रथे आरोप्य गृहमानीय गुरुणाज्ञप्तः सः पारसस्तस्याः पूजनादिकं प्रतिदिनं कुरुते स्म । तत एकदा सा प्रतिमा तं श्रेष्ठिपुङ्गवं स्वप्ने एवं जगाद । हे भक्त ! मम प्रासादं कारय'—श्रेष्ठी उवाच-- स्वामिन ! अहं तु नितरां दरिद्रः वित्ताभावात्कथं देवगृहं भवेत्-- प्रतिमयोक्तं द्रव्यस्य चिन्ता न करणीया यतः मम पुरस्ताल्लोकेन प्रत्यर्पिता अक्षताः स्वर्णमया भविष्यन्ति तैश्च पुष्कलं द्रव्यं तव गृहे स्वयमेवायास्यति परमियं वार्ता कस्याग्रेऽपि न प्रकाश्या--- इत्युक्त्वा देवोतिरोहितः ततः प्रभाते उत्थाय स देवग्रहं कारयितुं मनसि दृढविचारमकरोत् । तद्दिनत एव ये जनास्तत्रागत्य अक्षतान्यर्पयन्ति ते च स्वर्णमया भवन्ति स्म अथ कियता कालेन पुष्कले सुवर्णे सति श्रेष्ठिना देवग्रहनिर्माणं प्रारब्धं । तदा कियद्भिर्दिवसै

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विंशालमंडपमण्डितं प्राकारवेष्टितं तोरणपताकादिमण्डितं स्वर्णजटितस्तम्भविराजितं द्वारि स्थितमत्तवारणशोभितं पार्श्वयोः धर्मशालायुगलेन विराजितं कूपवापिकायुक्तं मनोहरमुद्यानशोभितमपरं स्वर्विमानामिव देवमन्दिरं जातं तन्महावैभवकार्यं विलोक्य लोकाः विस्मयं प्रपेदिरे। परं न कोपि किञ्चिन्मुखाद्वदाति। अथैकदा तस्य कनिष्ठपुत्रेणातीवाग्रहात् पृष्टं तात! एतावद्धनं त्वया कुतो लभ्यते? श्रेष्ठिनोक्तं रे पुत्र! त्वं बालकोसि अत ईदृग्विधेन प्रश्नेन तव किं कार्यमस्ति— पुत्रस्तु तच्छ्रुत्वा बालस्वभावाद्धठमवलम्ब्य भोजनादिकमपि त्यक्तवान्-- अथ तदाग्रहं विलोक्य स पारससाधुः स्नेहवशतस्तं सर्वमेव स्वर्णप्राप्तिसाधनं प्रत्यवोचत्। ततस्तदनन्तरं पूर्ववत् द्वितियेन्हि ते अक्षताः स्वर्णमया नाभवन् तेनावशिष्टं गृहमवशिष्टमेवासीत् परं श्रीदेवसूरिप्रभुपदपङ्कजप्रभाकरैः श्रीमुनिचन्द्रसूरिभिस्तत्रागत्य विम्वचैत्यस्य वेदाभ्रनेत्रक्षिति



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

( १२०४ ) प्रमिते वर्षे तस्य गृहस्य प्रतिष्ठा कारिता। तच्च फलवर्द्धिका नाम तीर्थं जातं तस्य महिमा न केनापि शक्यते वक्तुं यत्र च स्वयमेव भगवान् जिनः नृसिंहरूपेण तद्रक्षां करोति। तदाराधनविधिस्तु श्रीमज्जिनप्रभुसूरिकृतकल्पाद्विज्ञेया यदा स महाप्रभुस्तुष्टो भवति तदा प्रदीपहस्तस्तन्मन्दिरात् बहिरागत्य दर्शनेन कृतार्थयति जनान् वरांश्च प्रयच्छति। तत्र च द्वारेषु कपाटानि न सन्ति यतस्तत्र कपाटदानेन कपाटानां देवप्रभया स्वयमेव भंजनं भवति।

तत्र च पोषदशमीदिने महोत्सवं भवति सहस्रशो जनास्मिन् पर्वणि तत्र गत्वा दर्शनादिना पापान्नाशयन्ति। तत् स्नानजलेन नेत्रक्षालनात् अक्षिरोगाः नश्यन्ति प्रोक्षणेन च ज्वरा विलयंयान्ति—विशेषतः पोषदशमी एवास्य पर्व इति पोषदशमी व्याख्यानं। ----

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ मेरुत्रयोदशीव्याख्यानं प्रारभ्यते ।

मेरुदेव्याः सुतं नत्वा स्मृत्वा सद्गुरुभारतीम् ।
मेरुत्रयोदशीपर्व व्याख्यानं लिख्यते मया ॥—

इहाष्ट महाप्रातिहार्य विराजितेन जगद्गुरुणा श्रीवर्द्धमानस्वामिना श्रीगौतमादीनामग्रे यथा माघकृष्णत्रयोदश्याः महात्म्यमुक्तं तदेव परम्परातः श्रवणपथमागतमस्माभिरप्युच्यते ।

श्रीऋषभदेवेजिननाथयोरन्तरे पञ्चाशल्लक्षकोटिसागरोपमानि व्यतिक्रान्तानि, तन्मध्ये अयोध्यानगर्यां इक्ष्वाकुवंशभव अनन्तवीर्यो नाम राजासीत् स च बहुलहस्त्यश्वरथपदातिनायकः परमप्रतापी अभवत् । तस्य पञ्चाशतमिताः पत्न्यस्तासु प्रियमती नामैका राज्ञी महिषी धनञ्जयो नाम चतुरो बुद्धिनिधिश्च महामात्यो अभवत । एकदा सुखेन राज्यं



For Private and Personal Use Only

पालयतोनन्तवीर्यस्य मनसि ईदृग्विधा चिन्ता उत्पन्ना यदहो ! ममैकोऽपि पुत्रो नास्ति अतो मय्युपरतेऽस्य राज्यस्य भोक्ता को भविष्यति ? पुत्रं विना शून्यप्रायमेव गृहं इति विचार्य पुत्रोत्पत्त्यै अनेकविधं यत्नं कुरुते स्म । परं पुत्रोत्पत्तिर्न जाता ।

अथैकदा तस्मिन्नेवावसरे कोणिक नामा एकस्साधुराहारार्थं राजगृहे समागतस्तं राजदम्पती प्रत्युत्थानपूर्वकं सत्कृत्य शुद्धाहारेण भोजयित्वा करसम्पुटीकृत्य पुत्रोत्पत्त्युपायमपृच्छताम् । मुनिस्तु किञ्चिदपि प्रत्युत्तरं नावदत् । तदा पुनः पृष्टं । ततो मुनिः करुणयोवाच 'राजन् ! पुत्रस्तु भविता परं पङ्गुर्भविष्यति इत्युक्त्वा तूर्णमेव स मुनिरगमत्– ततो राजा राजपत्नी च भावी पुत्रजन्म आकर्ण्य मुदमवाप । अथ क्रमेण राजपत्नी सगर्भा जाता पूर्णे च दशमे मासि सा कुमारमजीजनत् । राज्ञा च पुत्रजन्मसमये महदुत्सवं कृतं, द्वादशे दिवसे च सकलमपि परिवारं भोजयित्वा राजकुमारस्य 'पिंगलराय' इति

नाम चक्रे । अथ च राजा तं राजकुमारं पंगुं विज्ञाय अन्तःपुरे एव वासयति न कदाचिदपि बहिर्निष्कासति येन कोपि तं पश्येत् । यदा कोपि जनः अस्य कारणं पृच्छति चेदेवं ब्रवीति । यदस्य महीयानत्यद्भुतरूपं वर्तते अतो दृष्टिदोषभयान्मया बहिर्निष्क्रमणं निषिद्धं । अत एव सर्वस्मिन्नेव नगरे एषा जन श्रुतिः प्रथिता अभूत् । लोकाश्च एवं ब्रुवते स्म यत्पिङ्गलरायनामा राजकुमारसदृशः पृथिव्यामपरः कोपि रूपवान् न वर्तते । अथास्मिन् लोकरवेक्रमेण देशाद्देशान्तरं गते सति सर्वस्मिन्नेव भूमण्डले अस्य रूपलावण्यशोभाऽभवत् ।

अथैतस्मिन्नेवकाले अयोध्यानगरीतः सपादशतयोजनानन्तरं मलयनाम देशोस्ति तत्रेक्ष्वाकुवंशप्रभवः कश्यपगोत्रोद्भवो शतरथनाम राजा राज्यं कुरुते स्म । तस्य च इन्दुमती नाम्नी पट्टराज्ञी तस्याः कुक्षौ गुणसुन्दरी नाम कुमारिकाऽभवत् । सा चाति-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शयरूपलावण्यसौभाग्यादिगुणयुक्ता अपरा रतिरिवासीत् राज्ञश्चान्यः पुत्रः पुत्रिका च न अतस्तयोर्दम्पत्योरेषा गुणवती अतिवल्लभा बभूव। अथ कियता कालेन संजातयौवनामेनां कुमारिकां विलोक्य तद्योग्यवरमलभमानो राजा अहर्निशं तद्विवाह-चिन्तातुर एव आसीत्। एतस्मिन्नेवावसरे तन्नगरनिवासिनो केचन व्यापारिणः शकटेषु नानावस्तून्यारोप्य व्यापारार्थं देशान्तरं जिगमिषवो राज्ञः समीपं प्राभृतप्र-दानार्थमगमन् राजा च तान् सत्कृत्य बहुमानपुरस्सरमिद मूचे। देशान्तरं भ्र-मद्भिर्भवद्भिर्यदि गुणसुन्दरीयोग्यः कश्चिद्वरो लभेत्तर्ह्यस्यास्सम्बन्धमवश्यमेव विधेयं। ते चैतन्नृपाज्ञां शिरसि विधाय तथेति प्रत्युक्त्वा गृहमागत्य प्रभाते निर्गमिताः। ततः क्रमेण बहून् देशान् ग्रामान् जनपदांश्च विलोकयन्तो अयोध्यायामागतास्तत्र च बहूनां वस्तूनां विक्रयान्महीयान् लाभ अपि संजातः अतस्तद्देशभवान्यन्यानि वस्तूनि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संगृह्य यदा गन्तुमुद्यतास्तदैव नगरनिवासिनां मुखादस्यराजकुमारस्य महानद्भुतं रूपलावण्यादिकं श्रुत्वा नृपेणोक्तं च वाक्यं स्मरणपथमुपागमत् । अतस्ते प्राभृतादिकमादाय अयोध्याराजस्य समीपे गत्वा कुमारेण सह गुणसुन्दर्याः विवाहसम्बन्धं चक्रुः । राजाऽपि सम्बन्धं निश्चित्य तेषां दानमानादिभिरादरं चक्रे । ततस्ते सम्बन्धं विधाय हर्षितास्सन्तो स्वदेशं प्रति जग्मुः । अथ कियता कालेन स्वदेशमागत्य राज्ञः समीपे गत्वा सम्बन्धसम्बन्धीसर्वमेव वृत्तान्तमकथयन् । राजा चेदृग्विधामनुपमां कुमाररूपलावण्यवार्तां श्रुत्वातीव सन्तुष्ट आसीत् । अथ व्यतीते बहुतिथे काले विवाहयोग्यां कन्यां विज्ञाय पाणिग्रहणहेतवे राजा कुमारानयानार्थं स्वसेवकान् प्रेषयामास । ते च अयोध्यां गत्वा विवाहसम्बन्धिनीं नृपेणोक्तां सकलां वार्तामकथयन् ।

राजा चैतच्छ्रुत्वा तान् सत्कृत्य सिंहासनात्सद्य उत्थाय प्रासादान्तरे गत्वा प्रधान-



For Private and Personal Use Only

मन्त्रिणमाहूय इत्थमुवाच 'मन्त्रिन्! अद्यार्किं विधेयं? पुत्रस्तु पंगुः वर्त्तते अनेन सह कथं लग्नं भविष्यति? कश्च स्वकीयां कन्यां पङ्गवे दास्यति? अतोऽद्ययच्छ्रे-यानुपायस्तदेव कर्तव्यः, । मंत्री तच्छ्रुत्वा क्षणं विचार्य तान् दूतानाहूय इत्थमुवाच भो राजसेववकाः! कुमारस्तु साम्प्रतमिह नास्ति मातुलगृहे गतस्तच्च इतो महीयान् दूरं वर्त्तते तथा च तस्यागमनमपि शीघ्रस्त्वसंभवः अतः साम्प्रतं तु लग्नं न भविष्यति अतो भवद्भिर्गत्वा राज्ञे निवेदनीयः । इति श्रुत्वा तैरुक्तं यथाज्ञापयतु स्वामिनः परं त्वस्मद्देशस्यापि महीयान् पन्था अतो लग्नं निर्द्धार्य दातव्यम् । भवद्भिश्च लग्नसमयो-पर्यागमनीयम् । इत्याकर्ण्य मासषोडशानन्तरं विवाहलग्नं निश्चित्य तान् प्रस्थापयामास ।

अथ निर्गतेषु तेषु राजा अनन्तवीर्य उद्विग्नमनाश्चिंतातुरस्सनुवाच अहोऽद्य मया किं करणीयं? षोडष मासा अपि सत्वरमेवायास्यन्ति । इति चिन्तया राजा राज

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पत्नी मन्त्री च सर्वे एव व्याप्ता अभवन् । एतस्मिन्नेवासरे साधुपञ्चशतीपरिवृतो गांगिलनामा कश्चित् साधुः तीर्थेषु भ्रमन् अयोध्यामागत्य तत्सीमावर्तिनि वने तपः समाचारन् तिष्ठति स्म । वनपालस्तूर्णमागत्य साधोरागमनं राज्ञे न्यवेदयत् । राजा तु तदाकर्ण्य हस्त्यश्वरथपदातिपरिवारितो सपरिवारः मन्त्रिभिस्सह तत्र गत्वा विधिना मुनिमभिवन्द्य तदनुज्ञप्तो आसने उपविष्ट धर्ममपृच्छत् । मुनिश्च राज्ञे जिनधर्मतत्वं प्रोवाच । तदित्थम् । राजन् धर्मस्यमूलं दया पापस्य च मूलं हिंसा य एको हिंसा करोति अन्यः कारयति अपरश्चानुमन्ता इमे त्रय एव समानपापिनो हिंसकास्सन्ति । यस्तु हिंसां कुर्वन् मनसि त्रासं नाप्नोति तस्य हृदये दया नास्ति यश्च निर्दयः सः बहूनेकेन्द्रियान् जीवान् विनाशयति स मृतस्सन् अन्यजन्मनि वातपित्तादिव्याधियुक्तो भवति यश्च द्वीन्द्रियान् विनाशयति स विद्याशून्यः मुखरोगी दुर्गंधनिश्वासश्च



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नानादेशेष्वटमानः सुरपुरनाम्नि नगरे समागतस्तत्र पञ्चकनाम्ना केनचित् श्रेष्ठिना तं सुन्दराकारं विलोक्य स्वगृहपार्श्ववर्तिनो जिनमन्दिरस्य रक्षकपदेऽवस्थापितः । स च प्रत्यहं मन्दिररक्षां करोति परं पूजनार्थमागतानां देवार्पितवस्त्राभरणफलादीन् द्यूतक्रीडार्थं प्रच्छन्नं समादत्ते । अथ कियद्भिर्दिवसैः श्रेष्ठिना तद् ज्ञातं । ततस्तमाहूय श्रेष्ठी उवाच "हे भद्र ! यः पुमान् देवद्रव्यं भुंक्ते स अनन्तकालं यावत् संसारपरिभ्रमणं करोति तस्मात्त्वया अतः परमेतन्न कार्यम् इत्यादि समुपादिशत् । तथापि स दुष्टः मिथ्याज्ञानतिमिरावृतो न हि तस्मादुपेक्षते स्म । एकदा देवस्याभरणादिकमपि चोरयामास ततः श्रेष्ठेनैतद्विज्ञाय तमाहूय भर्त्सनादिकं कृत्वा निस्सारयत् । अथ च स दुष्टस्ततो निर्जीविकः वनेषु भ्रमन् मृगयादिना वहून् वन्यजन्तून् मृगशशकादीन् विनाशयाति स्म । तस्मिन्नेव वने एकस्तापसाश्रमस्तत्र च बहवो मुनयस्तपः कुर्वन्तस्तिष्ठन्ति । अतस्तद्वनेभवाः वनचराः मृगाद्यास्तद्भीतिभीता-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

भवति यश्च इन्द्रियत्रययुक्तानां जीवानां नाशकः स नासिकारोगी चतुरिन्द्रियघाती अक्ष्णा काणः अन्धः क्लिन्ननेत्रो वा भवेत्। पञ्चेन्द्रियविनाशकृद्बधिरो भवति यश्च पञ्चेन्द्रिय विनाशकारी स पटूनीन्द्रियाणि नाप्नोति। तस्माद् भोभव्या! हिंसानृतादिकं सर्वथा परित्याज्यम्। इति श्रुत्वा राजा गुरुं पपृच्छ "स्वामिन्! मदीयः पुत्रः केन कर्मणा पङ्गुर्जात इति ब्रूहि। गांगिलेनोक्तम् राजन! अस्य प्राग्भवं शृणु।

अस्य जम्बूद्वीपस्य ऐरावतनाम क्षेत्रान्तर्वर्ति अलपुरनाम्नि नगरे महेन्द्रध्वजो नामा काश्चिद्राजा आसीत् तस्य च उम्मानाम पट्टराज्ञी तयोस्सामन्तसिंहो नाम पुत्रोऽभूत्। स च राजकुमारः पाठशालायां पठनार्थं गच्छन् द्यूतकृतां संगतो द्यूतमेवाहर्निशं कुर्वन् सप्तव्यसनतत्परोऽभवत्। राज्ञा च बहुशो निषिद्धः परं यदा व्यसनसप्तकं न त्यक्तवान् तदायोग्यं तं ज्ञात्वा स्वदेशाद्बहिर्निष्कासितः। ततोपि स तदेवव्यसनमभ्यसन्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च सह गिरिमारुह्य सूर्यकुंडजले स्वयं स्नात्वा पुत्रमपि स्नापयामास परं तज्जलं चरणमपि तस्य न स्पृशति यतः स्वयंप्रभोः कर्मफलं न क्षीणं अतो देवताधिष्ठितजलमपि तं न स्पृशति तद्दृष्ट्वा किमिदं किमिदमिति ब्रुवन्तः सर्वे एव विस्मिता ह्यभवन् तदा तस्मिन् संघे एको महात्मा आसीत् तं विलोक्य श्रेष्ठिना पृष्टं 'भगवन् ! किमत्र कारणमिति ब्रवीतु भवान् । मुनिरूचे 'अनेन पुरा बहुशो देवद्रव्यं भक्षितं तथा चैकस्या मृग्याश्चत्वारः पादाः च्छेदितास्तत्कर्म बहुशः क्षीणं परं किञ्चिदवशिष्टमास्ति तेन तीर्थजलं न स्पृशति । यतस्तीव्रकर्माणि फलभुक्तिं विना न हि क्षीयन्ते । एतन्मुनिवचः श्रुत्वा स श्रेष्ठी तस्य च पत्नी स च पुत्रस्त्रय एव सम्प्राप्तवैराग्याः सन्तो श्रीऋषभदेवचरणावभिवन्द्य गृहमागत्य धर्मकरणोद्यताः बभूवुः ।—

अथ व्यतीते महीयसि काले स श्रेष्ठिपुत्रः देहं परित्यज्य कर्मक्षये देवलोकं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राप तत्र च भोगान् भुक्त्वा पुनरपि किञ्चित्कर्मशेषात् हे राजन् अनन्तवीर्य! तव गृहे पिङ्गलरायेति नाम्ना पुत्रत्वेनोत्पन्नः परं पूर्वजन्मजन्यकर्मफलतः पंङ्गुरेवास्ति इत्थं स गांगालिमुनिः कुमारस्य प्राग्भववृत्तान्तमुक्त्वा पुनरप्याह "मद्यपानाद्यथा जीवो न जानाति हिताहिते। धर्माधर्मौ न जानाति तथा मिथ्यात्वमोहितः ॥ १ ॥ मिथ्यात्वेनालीढचित्ता नितान्त--तत्त्वातत्त्वंनैव जानन्ति जीवाः। किं जात्यन्धाः कुत्रचिद्वस्तुजाते, रम्यारम्ये व्यक्तिमासादयेयुः ॥ २ ॥ अभव्याश्रितमिथ्यात्वे अनाद्यन्ता स्थितिर्भवेत्। साभव्याश्रितमिथ्यात्वे अनाद्यन्ता पुनर्मता ॥ ३ ॥ इति"—ईदृक् मिथ्यात्वोदयाज्जीवान्कर्माणि बध्नान्ति। तव पुत्रेणापीत्थमेव दुष्कर्म उपार्जितं तेन पंगुर्जातः।

एतन्मुनिवचः श्रुत्वा राजा पुनरपि प्राह हे स्वामिन्! एतत् कर्म केन पुण्येन नश्यति? मुनिनोक्तं। हे राजन्! तृतीयारकप्रान्ते सार्द्धाष्टमासयुतवर्षत्रये शेषे सति



For Private and Personal Use Only

त्रयोदश स्वर्णघटितास्त्रयोदश च रत्नजटिताः प्रतिमाः संस्थापयामास । त्रयोदशविधैः रत्नैश्च मेरुपञ्चकं निर्माय तान् पञ्चमेरून् देवमन्दिरे समर्पयत् । संघेन सह त्रयोदशवारञ्च तीर्थयात्रामकरोत् त्रयोदश धार्मिकावासानि च तत्र कृतानि । ततो कालन्तरेण जातवैराग्यः सन् स्वपुत्राय महसेनकुमारनाम्ने राज्यं दत्त्वा स्वयं बहुभिः राजपुरुषैस्सह सुव्रताचार्यसमीपे गत्वा दीक्षां प्रगृह्य द्वादशांगीं च तेभ्यः सकाशादधीत्य तपः कुर्वन् क्रमेणाचार्यपदं लेभे । ततश्च कियता कालेन क्षपणकश्रेण्यारोहणार्थं अष्टमगुणस्थाने शुक्लध्यानं ध्यातुमुद्यतो भूत्वा क्रमेण कर्माणि क्षपयन् द्वादशगुणस्थानान्त्यसमये कर्मचतुष्टयं ध्यानेन नाशयित्वा केवलज्ञानं लब्ध्वा बहून् भव्यान् बोधयन् पृथिव्यां यथेच्छं विचरन् द्विसप्ततिवर्षमितं पूर्णायुः प्रपाल्य पञ्चह्रस्वाक्षरोच्चारणतो योगमार्गेण शेषकर्म क्षपयित्वा मुक्तिं प्राप्तः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थं पिंगलरायतो मेरुत्रयोदश्या महिमा प्रवृत्तः । अस्यां त्रयोदश्यां पुरा रत्नमये मेरवो ढौकिताः पुनश्च कियत्कालं यावत् स्वर्णमयाः ततश्च रौप्यमया इदानीन्तु घृतमया एव मेरवः सम्प्रवृत्ताः । इति मेरुत्रयोदशीमहिमानं श्रुत्वा भव्यजनैः । शुद्धभावपूर्वकमेतद्व्रतं करणीयम् । येनेह परत्र च सुखसम्पत्तिः स्यात् ।

सम्वद्व्योमरसाष्टेन्दु (१८६०) मिते फाल्गुनमासके ।
एकादश्यां कृष्णपक्षे वीकानेराख्यसत्पुरे ॥ १ ॥
व्याख्यानान् प्राक्तनान् वीक्ष्य निबद्धांल्लोकभाषया ।
व्यलेखि देववाणीतः क्षमकल्याणपाठकैः ॥ २ ॥
संविग्नवाचनाचार्यपदस्थानां सुधीमताम् ।
श्रीयुक्तामृतधर्माणां शिष्योऽयं वाग्विदाम्वरः ॥ ३ ॥





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

( त्रिभिर्विशेषकम् ) ॥

इति मेरुत्रयोदशीव्याख्यानं सम्पूर्णम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ होलिकाव्याख्यानं लिख्यते ।

होलिका फाल्गुनेमासि द्विविधा द्रव्यभावतः ।
तत्राद्या धर्महीनानां द्वितीया धर्मिणां मता ॥ १ ॥

अयमर्थः । लोका हि पर्वमिदं होलिकेति वदन्ति । तच्च होलिका तु द्विधा द्रव्यतो भावतश्च । तत्र येऽज्ञानिनः सदसद्विवेकविकलाः लोकप्रवाहरक्ताः श्रीजिनधर्मतो विमुखास्ते तु काष्टगोमयादिना वन्हिमयीं द्रव्यहोलिकां कुर्वन्ति । अपरदिने च धूलिक्रीडनावाच्यजल्पनमलमूत्रोत्क्षेपणवस्त्राकर्षणाद्यसभ्यजनोचित रासभारोपितनरक्रीडादिविधिं कुर्वन्ति । परं सर्वमिदमनर्थकं विज्ञाय महद्भिराचार्यैर्जैनधर्मानुसारिभिश्च न विधेयं । किन्तु ये पुनर्धार्मिकास्ते तु तपोरूपजाग्रद्वन्हिना कर्मदलभस्मीकर-



For Private and Personal Use Only

णरूपां भावहोलिकां कुर्वन्ति । अन्यत्तु सर्वमेव लौकिकं कर्म रजसा प्रवृतमिति प्रश्नमाशंक्य सम्प्रदायगम्यं तत्कथानकमुच्यते ।

एकदा जयपुरनाम्नि नगरे जमवर्मनामा राजासीत् तत्रैव मनोरथनामा श्रेष्ठी तस्य चत्वारः पुत्रा एका तु होलिनाम्नी पुत्री स च पित्रा महोत्सवपूर्वकं विवाहिता परं स्वकर्मवशाद्विधवा जाता । अतः सदा पितुर्गृह एव निवसति स्म । अथैकदा निज-प्रासादगवाक्षे स्थिता होली मार्गेण गच्छंतं वङ्गदेशस्वामिनो भुवनपालाभिधस्य राज्ञः काम-पालनामानं पुत्रं विलोक्य कामाकुला जाता । सोऽपि तां विलोक्यातीव कामेन व्याप्त आसीत् । श्रेष्ठी च तां गुप्तपीडापीडितां विलोक्य विषादं जगाम । इतः श्वोऽहनि तत्र पुरे एका साध्वी वसति स्म । सा च चन्द्ररुद्रमंडनाम्नो कस्यचिद्भरटस्य पुत्री अचलभूति नाम्नी तथा च कस्य च भरटस्य पत्नी ढुंढा इति नाम्नी आसीत् । सा च ढुंढा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कूटकपटकारिणी लोकानामनेकानि कूटकर्माणि करोति स्म। भिक्षार्थं क्षुधातुरा सती प्रतिदिनं गेहे गेहे भ्रमति स्म। परमस्याः कूटाचरणाद्भीतो लोक अस्यै भिक्षां न प्रयच्छति अत एव सा लोकोपरि चुक्रोध। अथैकदा मनोरथश्रेष्ठी तामाहूय भोजनादिभिः सत्कृत्य कृताञ्जलिरिदमूचे 'मातः! ममैषा होली नाम्नी पुत्री सदाचारतो परिभ्रष्टा निन्द्यकर्म कर्तुमुद्यता प्रतिभाति अतश्चैनां त्वं सुशीलां साध्वीं सदुपदेशैर्विधेहि। ढुंढा तस्य वचः समाकर्ण्य तथेति प्रतिज्ञाय होलीसमीपे गत्वा वार्तालापादिना तस्या मनःवशवर्तिनी सखीव बभूव। अथैकदा एकान्ते तयोक्तं हेपुत्रि! त्वया ममाग्रे सर्वमेवाभिप्रायं कथनीयं यतोहं तु तव सखी एवास्मि तर्हि का लज्जा इति ढुंढावचः श्रुत्वा सा सर्वमेवाभिप्रायमकथयत्। ढुंढया चोक्तं हे पुत्रि! एवं चेत् रविदिने पूजामिषतस्त्वया सूर्यमन्दिरे आगन्तव्यं तत्रैवाहं तेन कुमारेण सह-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तव संयोगं कारयिष्यामि यत एतादृशेषु महोत्सवेषु अनेकेषां पुंसां सङ्गमो भवति तेन यथेच्छव्यभिचारासिद्धिः । इति तामभिमन्त्र्य राजकुमारसमीपे गत्वा सर्वं वृत्तान्तमकथयत् । अथ च राजकुमारस्तया संकेतितः रविदिने तत्रायातः सापि श्रेष्ठिकुमारिका तत्रागत्य सूर्यमूर्तिमभ्यर्च्य यावद्बहिर्गन्तुमुद्यता तावदेव कुमार अवसरं ज्ञात्वा हस्ताभ्यां तां गाढमालिङ्गितवान् । सा तु एतद् विलोक्य झटिति राजकुमारं मुष्टिना प्रहृत्य कुपिता सती तं निर्भर्त्स्य पश्यत्सु सर्वजनेषु इदमूचे । 'अहो किमिदं मामयं दुष्ट अस्पृशदतो परपुरुषस्पर्शजन्यपातकशुद्धये अग्निप्रवेशनमेव वरमतोहमग्निं प्रवेक्ष्ये इति प्रललाप' इत्याश्चर्यं विलोक्य सर्वे एव विस्मिता जाता स श्रेष्ठी च इत्थं श्रुत्वा झटिति तत्रागत्य तां मरणाभिमुखीं विलोक्य बलात्तां गृहमानयत् ।

अथ पिता अनया लीलया तां सुशीलां मनुत स्म । किन्तु इतः परं सा ढुंढा

For Private and Personal Use Only

 रात्रौ तस्याः समीपे तं राजकुमारं गुप्तमानयाति स्म । कियता कालेन तयाहृढप्रेम अभूत् । 
अथैकदा फाल्गुनपूर्णिमाया रात्रौ सा ढुंढा तयोस्तत्र संगमं कारयित्वा स्वयं बहिः सुप्ता गाढनिद्रां प्राप्तवती । सा होला तु तां तत्र सुप्तां ज्ञात्वा 'षट्कर्णेऽभिद्यते मन्त्रः' इति विचार्य शीघ्रमुत्थाय तद्गृहे वन्हिं प्रज्वाल्य स्वयं तेन कुमारेण सह बहिर्निसृत्य कुमारगृहे अगमत् । ढुंढा तु तस्मिन्नेव गृहे अदहत् । अथ प्रभाते उत्थितः स श्रेष्ठी तं गृहं तत्र सुप्तां च पुत्रीं दग्धां ज्ञात्वा विललाप । लोकास्तु तां सतीं ज्ञात्वा तस्या भस्मं प्रणमन्ति स्म धारयन्तश्च केचित्तस्या, गुणान् गायन्तो विचरन्ति स्म च । तत्प्रभृत्येव प्रतिवर्षे तद्दिने होलीपर्व प्रवृत्तं । तदेवाधुनापि परमार्थशून्याः जनाः कुर्वन्ति । अथ च गतेषु कतिपयदिनेषु स कुमारः होलीं प्रोवाच यत् 'भद्रे ! इदानीं सर्वमपि धनं गतं अतो धनमुपार्जनहेतवे विदेशं गमिष्यामि '। इति श्रुत्वा तयोक्तं 'स्वामिन् !



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विदेशं मा याहि, मदुक्तमुपायं कुरु येन धनप्राप्तिः स्यात् । तच्चेदं त्वं मत्पितुर्हट्टायां गत्वा एकां शाटिकां मदर्थं क्रीत्वा आनय । ततस्तेन तत्र गत्वा तथैव मूल्येनैका शाटिका नीता, परं तां विलोक्य तयोक्तं नैषा अत्यर्थशोभना अत अपरामानय । तेन तथैव तत्र गत्वा पुनरन्यानीता परं सापि तया प्रत्यर्पिता । तेन च पुनरपरानीता ततः सापि तया न गृहीता ततः पुनरपि यदा तां शाटीं परिवर्तयितुं स कुमारः श्रेष्ठिसमीपे गतस्तदा श्रेष्ठिनोक्तं । भो भद्र ! एतेषां वस्त्राणां परीक्षा तु स्वयमेव स्त्रियः कुर्वन्ति अतो भवान् तां स्वपत्नीमत्रैवानय यतः सैव स्वयं परीक्ष्य यथेप्सितां शाटिकां क्रेष्यति इति श्रुत्वा कुमारस्तत्रागत्य तां तत्रानीतवान् । स श्रेष्ठी तु सद्य एव तां विलोक्य चकितमनाः प्रेमाकुलस्सन् झटित्युत्थाय अहो एषा तु ममैव पुत्रीत्युवाच । कामपालस्तल्लीलां दृष्ट्वोवाच हे सरलस्वभावश्रेष्ठिन् ! किमिति भाषसे ! त्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वन्हिना दग्धां निजपुत्रीं किं न स्मरसि यतः पुरा बहुषु दिनेषु तस्मिन् सूर्यमन्दिरे गच्छतो मम त्वदीयपुत्र्यां भार्याभ्रमोऽभूत् । अधुना च मम भार्यायां तव निजपुत्रीभ्रमस्समुत्पन्नः अत एवं प्रतिभाति यदेतयोर्द्वयोरेव रूपं सदृशमास्ति । यतः परस्परमावयोर्भ्रमः समुत्पन्नः । श्रेष्ठी चैतच्छ्रुत्वा किञ्चिद्विचार्य प्रेमविह्वलस्सन् उवाच । हे भव्य ! त्वयोक्तं सत्यं परं सा मम पुत्री अतीव वल्लभासीत् अत इतः परमेषा तवैव भार्या मम पुत्री भवतु यत अनयैव शोकसंविग्नं स्वमानसं तोषयिष्ये इत्युक्त्वा स श्रेष्ठी तामेव पुत्रीं प्रकल्प्य वस्त्रालंकारादिभिः पूजयामास ।

अथ सा परिव्राजका ढुंढा वन्हिना दग्धा पिशाचयोनिं सम्प्राप्ता परं पूर्वजन्मजन्यस्मृतिस्तस्या न विस्मृता । अतः सा तान्नगरनिवासिनो जनान् विलोक्य





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अहो इमे पूर्वं मे भिक्षामपि नाददन् अत एवाहमद्य महोत्पातं विधास्ये एवं विचिन्त्य सा दुष्टा नगरनिवासिनामुपरि पाषाणवर्षणाद्युत्पातांश्चक्रे । तेनातीवदुःखितास्ते पैशाचीं लीलां ज्ञात्वा तदुपशमनाय वल्यादितान्त्रिकानुष्ठानांश्चक्रुस्तेन सा एकस्मिन् दिने कस्याश्चिन्नगरनिवासिन्या वृद्धायाः शरीरे सम्प्रविश्य सर्वानुवाच भो लोकाः ! पूर्वस्मिन् भवेऽहं भंडानां कुले उत्पन्नाभवं मत्पतिस्तु नित्यं भ्राष्ट्रजीवी आसीत् अतोहं भंडान् भ्राष्ट्रजीवीनो भरटांश्च त्यक्त्वा सर्वान् लोकान् पीडयिष्ये यतः केपि मा भिक्षामात्रेणापि न तोषितवन्तः यतो येऽस्मिन् ममोपरमणमासि भंड प्रायाः भरटप्रायाश्च भविष्यन्ति तेषां मज्जन्या काचिदपि पीडा न भविष्यति इत्युक्त्वा सान्तर्दधे ।

अथ च मरणाद्भीता जनास्तद्दिनत अन्यं जीवनतोपायमलभमानाः स्वयमपि फाल्गु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ने मासि भंडभावमाश्रित्य अश्लीलादिवाक्यानिभाषमाणास्त्यक्तलज्जा असभ्याचरणमाचरन्तः भस्मकर्दमादिना देहमालिप्य भरटप्राया भूत्वा परिभ्रमन्ति स्म । अत एव होलिकाद्वितीय दिने सर्वान् जनान् भरटप्रायान् कारयितुमिदं धूलिकापर्व समुत्पन्नं- तेन सा प्रसन्नाभूत्वा स्वस्थानं गता ।

इत्थं वृथैवोत्पन्नं होलिकापर्व विज्ञाय सुधीभिर्भव्यात्मभिस्तन्नकर्तव्यं किन्त्वस्मिन् पर्वणि भव्यात्माभिः श्रावकै र्जिनधर्म एवाराध्यः यतः सएवात्र जगतीष्टार्थसाधकः कल्याणकृच्चवर्तते इति होलिकाप्रबन्धः ।

संवद्बाणकृशानुसिद्धिवसुधा ( १८३५ ) संख्य नभस्ये सिते
पक्षे पावनपञ्चमीसुदिवसे पायेधि संज्ञे पुरे ॥
श्रीमच्छ्री जिनलाभ सूरिगण भृत्तुल्यप्रतापोद्धुरे ।





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कांते श्रीजितचन्द्रसूरिमुनिभिर्धर्मेशतां बिभ्रति ॥ १ ॥
श्रीमन्तो गुणशालिनः समभवन् प्राङ्यादिमासागरा–
स्तच्छिष्यामृतधर्मवाचकवराः सन्ति स्वधर्मादराः ॥
तत्पादाम्बुजरेणु प्राप्तवचन स्मर्ता विपाश्रितक्षमा
कल्याणः कृतवानिदं व्याख्यानमाख्यानभृत् ॥ २ ॥

## इति होलिका पर्व व्याख्यानं ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ चैत्री पूर्णिमायाः व्याख्यानं लिख्यते ।

तीर्थराजं नमस्कृत्य श्रीसिद्धाचलसंज्ञकं ।
चैत्रशुक्लपूर्णिमायाः व्याख्यानं क्रियते मया ॥ १ ॥
सिद्धा विज्झायचक्की नम विनयिमुणी पुंडरीओ मुणिन्दो
बाली पज्झयान्नसंबो भरसुकमुणी सेलगो पंथगोवा ॥
मुत्ता एवं अणेगे विमल गिरिमहं तित्थमेयं नमामि ॥ २ ॥

व्या० । अहमेतत्तीर्थं नमामि यत्रानेके प्राणिनः सिद्धा बभूवुः । ते के तानाह यत्र विमलाचले विद्याधरादि चक्रवर्तिनः सिद्धाः मुक्तिं प्रापुः । पुनर्युगादिदेवस्य चद्वौ पुत्रौ नामिविनामिनामानौ मुक्तिं गतो । तत्सम्बन्धिनी कथाचेत्थम् ।

अयोध्या नगर्यां भगवान् श्री ऋषभदेवः भरतनाम्ने स्वपुत्राय राज्यं दत्त्वा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्येभ्यः पुत्रेभ्य अपि यथायोग्यं देशं विभज्य स्वयं दीक्षां गृहीतवान्। तदैवास्य नामिविनामिनामानौ कस्मैचित् कार्याय कुत्रचित् प्रदेशे गतावास्ताम् । अतएव राज्यविभागावसरे भगवता ऋषभदेवेन तौ द्वावेव विस्मृतौ । यदा तौ कियता कालेनायोध्यामागत्य पितरमदृष्ट्वा भरतं पितृवार्तां पप्रच्छतुस्तदा भरतेनोक्तं पितातु प्रव्रज्यगतोऽस्ति युवाभ्यां तु मम सेवाकर्तव्या यतः युवयो राज्येविभागस्स्वामिनैव नकृतः अताहमेव युवां भरिष्ये । श्रुत्वा जातक्षोभौ तौ भरतं निभर्त्स्य वनेषु विहरतः पितुः समीपमागत्य तदग्रे कंटकादिकमार्गान्निवारयन्तौ कायोत्सर्गार्थं स्थितस्य च तस्य दंशमशकादींश्च निवारयन्तो प्रातस्तु प्रातर्वन्दनादिपूर्वं ' स्वामिन्राज्यप्रदोभव " इति प्रतिदिन मुच्चारयन्तौ अनेकविधिना तस्य सेवायां तत्पराबभूताम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथैकदा ऋषभदेवबन्दनार्थं धरणनामा इन्द्रः समागच्छत् सच इमौ शुश्रूषणततपरौ विज्ञाय प्रसन्नमना भगवद्रुपं कृत्वा तयोरुपरिमहर्तीं कृपांमकरोत । प्रथमतस्तु तेन युवाभ्यां अष्टचत्वारिंशत्सहश्रपठित सिद्धविद्याः प्रदत्ता ततश्च षोडशविधानां देवानां समाराधनं चोपादिष्टं । वैताढयनगरस्य दक्षिणश्रेण्यां रथनूपुरचक्रवालप्रमुखानि पञ्चाशन्नगराणि उत्तरश्रेण्याञ्च गगनवल्लभ प्रमुखाणि षष्टिनगराणि वासयित्वा यावन्तो नगराणि तावन्त एव देशान्विधाय सर्वमपि विभज्य आभ्यां प्रदत्तं । तौ चैतसर्वं लब्ध्वा इंन्द्रंनमस्कृत्य ऋषभदेवचरणावभिवाद्य ततोगत्वा इन्द्रेण दत्तं राज्यं विधिवत्पालयामासतुः । अथ च चिरकालं यावद्राज्यसुखमनुभूयान्ते सर्वसंग परित्यज्य दीक्षांगृहीत्वा श्रीविमलाचले समागत्य तत्रैव तपो विधया कालेन तौ द्वावेव नमि विनमि नामानौ परमपदं प्रायतुः । इति नमि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विनमि सम्बन्धः !

अत्रैव पुनः श्रीऋषभदेवस्य प्रथमगणधरः पुंडरीकनामा सिद्धो मुक्तिप्राप्तः तत्स बन्धस्त्वित्थं ।— श्रीआदिनाथस्य योग्ये ष्टपुत्रो भरतस्तस्य श्रीपुंडरीकनामा पुत्रः श्रीप्रभोर्मुखानिधर्मं श्रुत्वा प्रतिबुद्धस्सन् दीक्षां प्रगृह्य प्रथमगण धरोजातो यश्च पञ्चकोटि साधु परिवृतः ग्रामानुग्रामं विहरन् सौराष्ट्रदेशे समागतः । अथ च तद्देशीया जना स्तस्यागमनमाकर्ण्य सर्वे एव नरनार्य्यः धर्मश्रवणार्थं वन्दनार्थञ्च तत्रागमन् । एतस्मिन्नेवावसरे एका शोकजर्जरित शरीरा वाष्पजलाकीर्णनयना शुष्कवदना दीनरूपा महिला एकया युवत्या कन्यकया सह तत्रागत्य गुरुमभिवाद्य तेनादृयमा तत्रैवोपविश्यावसरं विज्ञाय पप्रच्छ । भगवन् अनया मत्कन्यया पूर्वजन्मनि किं पापं कृतं येन वैवाहिककरमोचने वेलायामेवास्याः पतिर्मृतः

For Private and Personal Use Only

इति प्रश्नेकृते गुरुर्गणधरः प्राह हे भद्रे अशुभकर्मणः फलमशुभमेवभवति तथाहि
जम्बूद्वीपस्य पूर्वभागे विश्वविख्यातं मनोरमं कैलासपर्वताकारं तुङ्गप्राकार-
वेष्टितं नानादेशोद्भवजनाकुलविशालगृहमण्डितं चन्द्रकान्तनाम नगर मासित् ।
तत्र श्रियोधामा सकलगुणगणग्रामः जगत्प्रसिद्धनामा समरसिंहाख्यो महीपतिः राज्यं
कुरुते स्म । तस्य च शीलालंकार धारिणी वल्लभानाम्नी पट्टराज्ञीबभूव । तत्रच
कश्चिन्महाधनाढ्यः जिनभक्तिरतः परमश्रद्धालुरनेकगुणसागरो धनबाह नामा
श्रेष्ठी अवसत् । तस्यकर्मयोगा द्वेभार्ये बभूवतुः एका कनकश्रीः द्वितीयाच मित्रश्रीः
ताभ्यांसह स श्रेष्ठी सुखेन कालं गमयतिस्म तेयारेकेकं दिनं निश्चित्य श्रेष्ठी
नियत दिने यथा क्रमं द्वयो समीपे क्रीडति अथकदा कनकश्रीनामज्येष्ठपत्नी
कामवशात् सपत्न्या दिनमर्यादाम्मुलंघ्य तत्रस्थितवतोः पत्युः समीपे समागतवती ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तामनवसरे सभायातां विलोक्य भर्ता प्रोक्तं । भद्रे त्वं याहि यतस्त्वया मर्यादो-लंघिता अदतु मित्राश्रिया सह विहरणदिनमस्ति श्वस्त्वयासह विहरिष्ये । इति श्रुत्वा कामावव्हला सा प्रोवाच । भगवन् । केयं मर्यादा तदा भर्त्रापुनरुक्तं दोव मर्यादोलंघनं श्रेयसे न कुलीनानान्तु मर्यादापालनमेव धर्मः यतः समुद्रोपि स्वीयां मर्यादां न त्यजति अतः सत्पुरुषाः कथं मर्यादां त्यजेयुः इत्याकर्ण्य सा कनकश्री संतोषरहिता रोषसहिता कलुष वदना मित्राश्रियं प्रतिद्वेष मुद्वहति स्वगृह मागत्य सपत्न्यासह पतिवियोगेच्छया यन्त्रमन्त्रोतन्त्रोपायादिना तस्याः शरीर भूत प्रेत शाकिनी डाकिनीनां प्रवेशमकारयत् । तेनाचिरेणेव कालेन मित्रश्री व्याधिपरिपीडिता भूताविष्टाजाता । अथ कनकश्री रपि अवसरं विज्ञाय मन्त्रवलेन पतिं स्ववशीचक्रे । स श्रेष्ठी अपि तांकनिष्टपत्नीं व्याधिपीडितां बुदध्वा पूर्वकर्मफलं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विज्ञाय तस्यामेवानुरक्तो बभूव । तदा ह[illegible] कनकश्रीः तेन श्रेष्ठिना नानाभोगान्
भुंजाना कालमत्यवाहयत् । तत कियत्का[illegible] सा शरीरं विहाय तवगृहेजाता
सपत्न्याः पतिवियोगकरणफलेन सद्य एव [illegible]पीडापीडिता बालविधवा जाता
अतएव हेभद्रे सैव पूर्वभवे श्रेष्ठिपत्नी क[illegible] इदानीं यातव पुत्री अस्ति कर्म
फलतो महद्दुःखभागिनी जाता यतः कर्मण[illegible]चित्रागतिरस्ति

इतिश्रुत्वा सा तन्माता पुनःप्रोचे गुरोः इदानीमेवेयं पतिविरहपीडिता वृक्षशाखायां
पाश बंध्व मरणायोद्यताऽभूत तदैव मयविलोकिता । अतोहं झटिति अस्या समीपत्वा
पाशं निकृंत्य हस्तमवलम्ब्य भवतां समीपे एनां समानायागतास्मि,' अतो भवद्भिरस्य दीक्षा
प्रदेया । ततो गणधरः प्राह—भद्रे! एषा तव पुत्री दीक्षायोग्या नास्ति नितरां चञ्चल-
स्वभावा बाला वर्तते । इति श्रुत्वा सा पुनः प्राह । भगवन्! तर्हि अस्या योग्यं धर्मकृत्यं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पट्टकादौ स्थापितां जिनप्रतिमां धर्मपुस्तकं वा मुक्ताफलनिर्मिततंदुलैर्महतीं पूजां विधाय गुरोः समक्षं पञ्चमशक्रस्तवादिभिर्देवान् वंदयित्वा शुभध्यानेन अहोरात्रमतिवाह्य पारण-बेलायां मुनिभ्यो दानं दद्यात् एवं पञ्चदशवर्षाणि यावत् प्रतिवर्षं समाचरेत् ततश्चोद्यापनं यथाशक्त्युपष्करेण कर्तव्यं । अनेन विधिना चैत्रपूर्णिमां कुर्वन् निर्द्धनोऽपि धनी स्यात् पुत्रकलत्रसौभाग्यादि प्राप्तिश्च भवेत् । देवसुखशिवपदमपि प्राप्नुयात् स्त्रीणां च पतिवियोगो न भवेत् तथा च रोगशोकवैधव्यदौर्भाग्यवंध्यत्वादि सर्वं एव कर्मफलं प्रणश्यति । अस्याराधनेन नार्यः पतिवल्लभाः भवन्ति विषकन्यादि कुष्टं च विनश्यति । बहुना किं ? भावपूर्वकमाराधिता चैत्री सर्वानेव सुखान् प्रयच्छति मुक्तिं च ददाति—

इति गणधरमुखाच्छ्रुत्वा सा बालातीव हर्षिता सति 'हे भगवन् अहमप्येतद्व्रतं करिष्ये'—इति गुरुपुरत उक्त्वा तमाभिवाद्य मात्रा सह स्वगृहमागत्य विधिना चैत्रशुक्लपू-

For Private and Personal Use Only

ब्रवीतु भवान् येन दुष्कर्मविपाकं नश्येत् गुरुस्तच्छुत्वा किंचिद्विचार्य प्राह—हे भद्रे! चैत्रशुक्लपूर्णिमाराधनं कारय तेन पूर्वकर्मफलविनाशमाप्नुयात् इति गुरुवचः समाकर्ण्य तस्याः कन्यकाया अपि गुरुज्ञानयोगात् श्रवणरुचिः समुत्पन्ना अतः सा सावधानीभूय गुरुवाणीमशृणोत्—गुरुणोक्तं—

हे भद्रे! श्रीसिद्धाचलतीर्थनामा कश्चिदनन्तफलदायी तीर्थमस्ति यत्रचानन्ताः जीवाः सिद्धिमुपयाताः - अतस्स एव सर्वतीर्थेषु मुख्यः तस्यैकविंशतिपवित्रनामानि सन्ति तेषां नाम्नां ध्यानं विधेयं। तत्र च चैत्रपूर्णिमादिने शुद्धभावेनोपवासं विधाय तस्मिन् तीर्थराजे स्नात्वा चैत्येषु जिनप्रतिमाः सम्पूज्य चैत्रशुक्लपूर्णिमाया महिमावर्णन-व्याख्यानं शृणुयात्। दीनहीनजनेभ्यश्च यथाशक्ति दानं देयं। तद्दिने शीलादि नियमाः पालनीयाः जीवरक्षा च विधेया तस्या विधिर्ग्रंथात् ज्ञात्वा गुरुमुखाद्वा श्रुत्वा—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साम्बेन सहात्रैव सिद्धिं गतः श्रीमद्दाराजस्य दशरथस्य भरताख्यः सुत अपि शिवत्वं प्राप्तः । श्रीशुकशैलकपंथिनश्चापि मुक्तिं प्राप्ताः । तथा च श्रीरामपञ्चद्रवनरपातिनारदाद्या महात्मानश्च मुक्तिं प्राप्ता ः । पाण्डवा अप्यस्मिन्नेव सिद्धाचले परमपदं याताः ।

अतश्चैत्रपूर्णिमादिने उपवास विधाय श्रीसिद्धाचले गत्वा पूजाध्यानादिकं ये प्राणिनः कुर्वन्ति ते महात्मानः नरकातिर्यग्गातिविच्छेदं नयन्ति । इत्येतत्पर्वाराधनस्वरूपमुक्तं । अतस्तद्दिने श्रीगुरोराज्ञया मन्त्राक्षरपूतं स्नानजलं गृहीत्वा ये नराः श्रीऋषभदेवाराधनं कुर्वन्ति त ऋद्धिं वृद्धिं सुखञ्च प्राप्नुवन्ति। अस्मिन्पर्वणि केचन दानं ददति केचित् तपस्तपन्ति केचन भावं भावयन्ति केचिच्च शास्त्रान् शृण्वन्ति तेन परमश्रेयो लभन्ते। इति चैत्रीव्याख्यानं ॥

नन्दरससिद्धचन्द्रप्रमिते वत्सरे वरे । इयं व्याख्या गुणग्राह्या चैत्रशुक्लाष्टमीतिथौ ॥ १ ॥ दुर्गे जैशलमेरौ च कृतावासेन धीमता । गुणिनामरचन्द्रेण वाचकेन सुसाधुना ॥ २ ॥

For Private and Personal Use Only

र्णिमायाः व्रतमारब्धं। तेनास्याः विषयवासनाशान्तिस्त्वचिरेणैव कालेनाभूत्। एवं पञ्चदशवर्षाणि यावद्व्रतमाराध्य पूर्णे व्रते विधिना तदुद्यापनमकरोत्। अथ च पुण्डरीकगणधरध्यानेन श्रीसिद्धाचलयात्राकरणेन च श्रीऋषभदेवजपप्रभावतो विनष्टपापा कालेनानशनं विधाय देहं विमुच्य सौधर्मदेवलोके देवत्वेनोपपन्ना तत्र देवसम्बन्धि भोगान् भुक्त्वा महाविदेहक्षेत्रे वसंतपुराधीशस्य नरचन्द्रनाम्नो राज्ञः राज्ये ताराचन्द्रश्रेष्ठिनस्तारानाम्न्यां भार्यायां स एव जीवः पुनः पुत्रत्वेन पूर्णचन्द्राभिधो भविष्यति। स च द्विसप्ततिकलायुक्तपञ्चदशकोटिमितधनी पञ्चदशभार्यो दशपुत्रः सर्वसुखसम्पन्नो भविष्यति। स एव पुनः चैत्रशुक्लपूर्णिमाराधनं करिष्यति तथा च जयसमुद्रनाम्नः गुरोः सकाशाद्दीक्षां प्रगृह्योत्पन्नज्ञानः कालेन परमपदं यास्यति एव चैत्र्याः समाराधनेन बहवो जीवाः परमानन्दं प्राप्ताः। यथात्रैव विमलाचले बालनामा महामुनिर्मोक्षं प्राप्तः अपि च श्रीकृष्णसुतः प्रद्युम्नोऽपि स्वसुतेन



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप स च महात्मा विंशतिलक्षमितानि वर्षाणि यावत्कौमारपदे स्थित्वा त्रिषष्टिलक्षवर्षमित-कालं राज्यं बुभुजे ततश्चैत्रकृष्णाष्टम्यामेव तेन ऋषभस्वामिना दीक्षा गृहीता। एतस्मिन्नेव समये श्रीबाहुबलनाम्नः राज्ञः पुत्रः श्रीसोमयशोनृपः हस्तिनापुरे राज्यमकरोत्। भगवान् ऋषभस्तु दीक्षां प्रगृह्य वर्षैकं यावदाहारालाभान्निराहार एव भूमण्डले पर्यटन् हस्तिनापुरमाययौ। अथ च हस्तिनापुरनिवासी कश्चित श्रेष्ठी स्वप्ने श्यामायमानं मेरुं स्वहस्तेनोद्धृतैरमृतपूर्णैः कनकघटैः प्रक्षालितं ददर्श। तथा च तस्यामेव रात्रौ सुबुद्धिनामाऽपरः कश्चित् श्रेष्ठी सूर्यबिम्बाच्च्युतं किरणसहस्रकं श्रेयांसेन पुनः स्थापितं स्वप्ने दृष्टवान्। राजा सोमयशश्च एकं वीरं बहुभिः शत्रुभिः प्रतिरुद्धं श्रेयांससहाय्यतः प्राप्तविजयं स्वप्नेऽपश्यत्। ततोऽतीतायां रात्र्यां प्रातस्ते त्रयः राजसभायां गत्वा मिलितास्सन्तः स्वं स्वं स्वप्नमूचुः। तदाकर्ण्य नृपादिभिस्सर्वैरेवोक्तं यदस्य स्वप्नस्य फलं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीजीवराजशिष्येण कृता व्याख्या मनोरमा । चैत्रशुक्लपूर्णिमायाः कान्तिरत्नसहायतः ॥ ३ ॥ त्रिभिर्विशेषकम् ॥ इति श्री चैत्रशुक्लपूर्णिमाव्याख्यानं समाप्तम् ॥



## अथाक्षयतृतीयाव्याख्यानम् ।

प्रणिपत्य प्रभुं पार्श्वं श्रीचिन्तामणिसंज्ञकम् ।
अक्षयादितृतीयायाः व्याख्यानं लिख्यते मया ॥ १ ॥

उसभस्सय पारणए इक्खुरसो आसि लोगना हस्स । सेसाणं परमान्नं अमियरससरिसो इवं आसि ॥ २ ॥ इहादौ श्रीऋषभस्वामी विमानादुत्तीर्य आषाढकृष्णचतुर्थ्यां श्रीमरुदेव्याः कुक्षौ प्रादुर्भूय दिनचतुष्टयाधिकमासनवकं यावद्गर्भे स्थित्वा चैत्रकृष्णाष्टम्यामर्द्धरात्रे जन्म



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मणिस्वर्णकन्यागजमुक्तादय इति । इत्थं चिन्तयन् स महात्मा श्रेयांसः गवाक्षादुत्तीर्य भगवन्तं ऋषभं त्रिःप्रदक्षिणीकृत्याभिवाद्य कृतांजलिरवोचत् । भगवन् ! प्रसन्नो भव मदर्पितां पूजां प्राभृतार्थमानीतान् शतसंख्याकान् घटांश्च गृहाण । भगवान् ऋषभदेवस्तदाकर्ण्य पूजार्थमानीतां महतीं सामग्रींञ्च विज्ञाय इक्षुरसग्रहणाय करद्वयं प्रसारितं श्रेयांसस्तु रत्नपात्रतुल्याय श्रीमद्भगवते त्रिकरणशुद्धया इक्षुरसरूपं निर्दुष्टमाहारं ददानो हर्षभरेण स्वचेतसा आत्मानं धन्यतरं मन्यमानः त्रिजगत्पूज्येन भगवताऽहारग्रहणतोऽनुग्रहीतोस्मीति चिन्तयन् स्वहस्तगृहीतैरिक्षुसपूर्णघटैर्भगवन्तं पाययदप्रीणयत्तातो देव भगवान् सर्वज्ञो ऋषभस्तं जिज्ञासुं विज्ञायाकाशे स्वकीयानि पञ्चादिव्यरूपाणि व्यदर्शयत । यतः पारणायेक्षुरसं सर्वश्रेष्ठमिति ब्रुवते श्रावकाः । एतदेवाह भगवान् भद्रबाहुः " उसभस्से " त्यादिना । गाथार्थस्तु श्रीप्रथमतीर्थंकरस्य ऋषभलोकनाथस्य प्रथमपारणे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वेवमेव यत् श्रेयांसस्य कश्चिदपूर्वो महान् लाभो भविष्यति । अथ तस्मिन्नेव दिने गृहं निर्याते श्रेयांसे स एव भगवान् ऋषभदेवः भिक्षार्थं तस्य गृहमाजगाम । श्रेयांसस्त्वागतं स्वामिनं विलोक्य जाताल्हादस्तं तुष्टाव यतो महात्मा ऋषभः महार्हपूजनोपचारैः स्वर्णगजाश्वादिभिश्च लोकेन पुजितोऽपि कस्याचिदपि सपर्य्यां नाऽग्रहीत्र । अत एव रुष्टं तं विज्ञाय सर्व एव जनाः स्वं स्वं भाग्यं गर्हयन्तः श्रेयांसस्य भाग्योदयं मेनिरे ।

श्रेयांसस्तु तद्दर्शनमात्रादेवोत्पन्नपूर्वज्ञानः 'अहो! ईदृग्विधं रूपं मया पूर्वमपि दृष्टमिति विचारयन् भगवता सह स्वस्याष्टमभवजन्यसम्बन्धं ज्ञात्वा ह्यचिन्तयत् अहो ! अज्ञानविजृम्भितमेतत सर्वं सांसारिकाणां जीवानां येन ते ईदृग्विधं मोहं कुर्वन्ति यतश्चायं भगवान् ऋषभदेवस्त्रैलोक्यराज्यमपि तृणाय मन्यमानस्सर्वमेव सुखं जलबुद्बुदवद्भावयन् साधुत्वमङ्गीकृत्य मोक्षाय यतते एनं महात्मानमेषा सर्वलोकमोहकरी माया परिमाणुमात्रमपि बाधते किं पुन-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मभूदिति शेषः । भुवनं स्वर्गमर्त्यलोकपातालरूपं यशसा भृतं अहो श्रेयांसेन त्रिजगत्पतये किमप्यदत्तपूर्वं दानं दत्तमिति त्रिलोकव्यापिनी तस्य कीर्तिरभूत् इति भावः । भगवान् ऋषभस्वामी रसेनेक्षुरसेन प्रतिहस्तो लोमभागमभूत् संयमलाभस्येक्षुरसाहारपूर्वकत्वात् । श्रेयांसस्यात्मा परमसुखं प्राप्तवान् । अतः सत्पात्रदानं प्रशस्तमित्याभिप्रायः ॥ ३ ॥ "रिस हेस समं पत्तं निरवद्यं इरकुरससमं दाणे । सेयं ससमो भावो हविद्यत इमग्गिय हुघा ॥" इयं गाथा तु स्पष्टार्थैव । ननु त्रैलोक्यपूज्यस्यापि भगवतः कथमेतावानन्तरायोऽजनिष्ट तत्रोच्यते। प्राकृतकर्मोदयात् । तथा हि । कस्मिंश्चित्प्राग्भवे ऋषभस्वामी जीवेन पथि व्रजता धानषले धान्यं भक्षयतो बलीवर्दान् कर्षकैस्तोद-नादिना ताड्यमानान् विलोक्य चिन्तितं यदिमे मूढाः वृषभमुखेषु शिक्यबंधनादिकमपि न जानन्ति अत इमान् एषा क्रिया वक्ष्ये इति विचार्य स्वयं तत्र स्थित्वा स्वहस्तेन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इक्षुरस आसीत् तच्च भगवतः पारणकं तस्य श्रेयांसस्य गृहे वैशाखशुक्लतृतीयायामभूत्। तद्दानस्याक्षयसुखजनकत्वेन तत्पारणदिनस्याक्षयतृतीयेति संज्ञा प्रथिताऽभवत्। अजितादि त्रयोविंशतितीर्थंकराणां अमृतरससदृशोयममृततुल्यपरमान्नं घृतशर्करादिमिश्रितं तु विशेषेणामृतमेवासीत् इति गाथार्थः। अथ पञ्चदिव्यान्याह। घुट्टं च अहोदाणं नोणिय आहयाणि तूराणि। देवाविसन्नवइया वसुहारा चेव बुट्ठाय। "-यदा श्रेयांसगृहे भगवता पारणं कृतं तदा देवै 'रहोदानमहोदान' मिति उद्घोषणा कृता तूर्यादीनि वादित्राणि च वादितानि दुंदुभयश्च हर्षात्ते नेदुरित्यर्थः। तथा च मेघोववर्ष सार्द्धद्वादशकोटिमिता स्वर्णवृष्टिरभूदित्यर्थः। उपलक्षणात् सुगन्धिजलवृष्टिरभूदित्यभिप्रायः॥ २॥ एतदेव स्पष्टयाति। " भवणं धणेण भुवणं जसेण भयवं रसेण पडिहच्छो। अप्पानि रुव मसुरकं सुपत्त दाणं महग्घविंयं। "- दानावसरे श्रेयांसगृहं स्वर्णरत्नमय-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमतश्शेरसिंहस्य रतलामनिवासिनः ।
आज्ञातः पुस्तकमिदं प्रमादबहुलान्वितम् ॥
यथामति सुधीरेण खेतडी नगरोकसा ॥
श्रीमता राज्यमिश्रेण गुरुदत्तेन शोधितम् ॥
शुभम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृषभमुखबन्धनादिक्रियोपदेशं कर्षकांश्चक्रे । तस्मिन् क्षणे तैर्बन्धनमुपगतैर्बलीवर्दैर्निःश्वासनां षष्ट्यधिकात्रिशतीर्मुमुचे । तद्विलोक्य भगवान् ऋषभदेवः अत्र भवे वर्षमेकं यावदाहारं न गृहीष्य इति प्रातिज्ञाय वर्षैकं यावन्न बुभुजे । समाप्ते च वर्षे तत्कर्मक्षयं ज्ञात्वा श्रेयांसगृहमागत्य पारणं कृतवान् । तद्दानफलेन श्रेयांसोपि मुक्तिसुखभाग्बभूव । तद्दिनादेव लोकेभ्यस्साधूस्य वर्षाणामेकसहस्रं यावल्लोकेषु विहृत्य तपस्तेपे । तत्रैव कर्मचतुष्टयं क्षपयित्वा केवलज्ञानं प्राप्य बहून भव्यान् प्रतिबोध्य मोक्षं जगाम । अत एव भो भव्याः । यूयमपि मोक्षमार्गे बव्हादरेण यतध्वम् इत्येव जन्मनो श्रेयान् लाभः । इति ।

अक्षयादि तृतीयायाःव्याख्यानं वीक्ष्य प्राक्तनं । अलेखि सुगमं कृत्वा क्षमाकल्याणपाठकैः ॥

इत्यक्षयतृतीयाव्याख्यानं समाप्तम् ॥ शुभंभूयात ॥

॥ समाप्त मिदम्पुस्तकम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति

# ॥ द्वादशपर्वीव्याख्यानम् ॥

For Private and Personal Use Only